"निर्माल्यानि न चाश्नीयात् न जिघ्रेन्न च लङ्घयेत्।"
इति तथान्यत्र,—

"निर्माल्यं च निवेद्यं च भुक्त्वा चान्द्रायणं चरेत्।"
इति अभक्ष्यप्रकरणे मनुपठितम्। तदेवमनेकसंहितासमधिगतनिषेधस्य निर्माल्यस्य कथमुपयोग इति भवतः पूर्वपक्षः। अत्राह कश्चित्,—

"नाड़िकादशकादर्वागुपयोगो न निन्द्यते।"
तत्रैन्द्रराव एव,—

"दशनाड्यधिकं पूर्णं स्थापयेत् तु विचक्षणः।
कालयोगः समुद्दिष्टो रात्रावहनि चैव हि॥
कालयोगातिरिक्तं तु निर्माल्यं परिचक्षते।
ततस्तदप्सु नैवाग्नौ क्षिपेद्भूमौ खनेत्तु वा॥"

इति। नेदं युक्तं नात्र निर्माल्यप्राशनादि प्रशस्यते, किन्तु पूर्णपूजायां,—

"———————— विनियुक्तस्य वस्तुनः।
नाड़िका दशके पूर्णे पश्चात् त्यागो विधीयते॥"

इति सामान्येन निवेदितस्य पुष्पौदनादेः क्षतकृत्यतया निर्माल्यत्वेनापनयने प्राप्ते नाड़िकादशपूर्णं पूजाङ्गतया स्थापनं विधीयते, "दशनाड्यधिकं पूर्णं स्थापयेत्" इति। अत्रोच्यते ईश्वरसंहितायां,—

"दुर्लभो भगवद्भक्तो लोकेऽस्मिन् पुरुषः सुत।
तत्रापि दुर्लभतरो भावो वै यस्य तत्त्वतः॥

पादोदक प्रतिग्रहभः सिद्धान्ने च निवेदिते।
स्रगादिके वोपभुक्ते उपभोगार्थमेव च॥
अतश्च भावहीनानाम् अभक्तानां च सम्मुख।
निषिद्धं भगवन्मन्त्रहृदक्यूतमखिलं जगत्॥"

इत्यनेन अविद्यालवोल्लासिजिह्वाग्राणामचेतसां सिताचितं वचनं सकलं केन्दुविम्बवद्भाति। ये पुनर्मूर्खास्तेषामेव निषेधबुद्धिरवतरति। वैष्णवाधिकारिभिः सेव्यमानं हि अघौघविध्वंसनाद्यालमिति ज्ञायते। एवमन्यत्र,—

"कुङ्कुमं चन्दनं चैतत् कर्पूरमनुलेपनम्।
विष्णुदेहपरामृष्टं तद्वै पावनपावनम्॥"

इति तथा चेश्वरसंहितायाम्,—

"उपभुक्तस्य सर्वस्य गन्धपुष्पादिकस्य च।
स्नानादावुपयुक्तस्य दधिक्षीरादिकस्य च॥
दूषणं न प्रयोक्तव्यं शब्दैरप्रतिपत्तिजैः।
निर्माल्यबुध्या देवीयं पावनं दूषयन्ति ये॥
ते यान्ति नरकं मूढास्तत्प्रभावापलापिनः।"

तथा भारते,—

"हृदि ध्यायन् हरिं तस्मै निवेद्यान्नं समाहितः।
मध्यमानामिकाङ्गुष्ठैर्गृहीत्वान्नं मितं पुनः॥
प्राणाय चेत्यपानाय व्यानाय च ततः परम्।
उदानाय समानाय स्वाहेति जुहुयात् क्रमात्॥"

इति तथा भारते,—

"पञ्चरात्रविदो मुख्यास्तस्य गेहे महात्मनः ।
प्रायणं भगवद्भुक्तं भुञ्जते चाग्रभोजनम् ॥"

इति तथा चाह भगवान् शौनकः "नैवेद्यं स्वयमश्नीयात्" इति । एवं भरद्वाजेऽष्टमेऽधिकारे,—

"नानिवेद्य हरेः किञ्चित् समश्नीयाच्च पावनम् ।"

इति एतत् स्मृतिशतोपष्टंम्भा च श्रुतिः महोपनिषदि "विष्णुनात्त-मश्नन्ति विष्णुनाघ्रातं जिघ्रन्ति विष्णुना रसितं रसयन्ति तस्मा-द्विद्वांसो विष्णूपहृतं भक्षयेयुः" इति । एवं च भगवद्विष्णुनिवे-दितान्नाद्युपयोगः श्रुतिस्मृतिशतसमधिगतः । तथा च भाग-वते,—

"त्वयोपभुक्तस्रग्गन्धवासोऽलङ्कारचर्चिताः ।
उच्छिष्टभोजिनो दासास्तव मायां जयेमहि ॥"

इति । निर्माल्यं भक्षयित्वेत्यादिनिषेधवचनानां का गतिरिति चेत् ? उत्सर्गापवादन्यायरावगतिः । मा हिंस्यादिति सामान्यतः सिद्धहिंसानिषेधो हि अग्नीषोमीयं पशुमालभेतेति विशेषतः प्राप्तवैदिकहिंसां परित्यज्य लौकिकहिंसामवलम्बते, तथा प्रकृते निर्माल्यभक्षणनिषेधो विशेषतः श्रुतिशत-तदुपबृंहणशतसमधि-गत-विष्णुनिवेदितान्नभक्षणं परित्यज्य रुद्रकाल्यादिनिवेदितान्न-भक्षणमवलम्बते इति ।

टी० अत्र प्रश्नाऽज्ञानाद्ग्रन्थगौरवात् प्रसिद्धेर्वाऽनुदाहृतानि वचनानि उदाहर्तव्यानीति विचार्य्याह,—यद्यपीत्यादि । "ब्रह्म-कूर्चं ततः पीत्वा" इति ब्रह्मकूर्चं होमशिष्टपञ्चगव्यम् । इन्द्र·

रात्रमन्नरात्रादिकं पाञ्चरात्रसंहिताविशेषः, न चोपजीवेत् स्वजीवनार्थं देवं न कल्पयेत् भवतः पूर्वपक्ष इति। अत्र कस्य-चित् समाधानमाह,—अत्र कश्चिदिति। 'उपयोगो न निन्द्यते' इत्यत्रोपयोगो न विनियोगः, किन्तूपयुज्यमानद्रव्यमित्यभि-प्रायेणाह,—नेदं युक्तमिति। अत्रोच्यत इति सिद्धान्त इति शेषः। अत्र सनत्कुमारसंहितायामित्यारभ्य अघौघविध्वंसना-यालमिति श्रायत इत्येतदन्तं प्रायश्च आगमप्रामाण्यवाक्यम्। प्रायणमिति प्रकृष्ट-भोग्यमित्यर्थः। रुद्रकाल्यादिनिवेदिते-त्यादि।

"पूजां कुर्य्यात् त्रिसन्ध्यं तु तथा भक्तिमचञ्चलाम्।
मम तीर्थप्रसादं च नैवेद्यं परिवर्जयेत्॥
अनर्हं मम नैवेद्यं पत्रं पुष्पं फलं जलम्।
निवेद्य भक्त्या भक्ष्यं तत्सर्वं कूपे विनिक्षिपेत्॥
पत्रं पुष्पं फलं चान्नं महादेवसमर्पितम्।
नाश्नीयात् परिगृह्यैतन्निखनेद्वा जले क्षिपेत्॥
जिह्वाचापल्यसंयुक्तो द्विजः संस्कारवर्जितः।
शिवनिर्माल्यभोजी च रौरवं नरकं व्रजेत्॥"

इत्यादिशिवपुराण-वायुपुराणस्मृतिवचनान्यभिप्रेत्य रुद्रकाल्यादि-निवेदितस्य वर्ज्यत्वमुक्तम्।

सञ्ज॰ इति रामानुजीयाः, भगवन्निवेदितवस्तूनां ग्रहणे विधिनिषेधयोः का गतिरिति प्रश्नस्य विधिनिषेधप्रतिपाद-कानि बहूनि वाक्यानि संप्रदर्श्य उत्सर्गापवादन्यायेन विष्णु-

निर्वेदिताद्ने विधित्वादतिरिक्ते निषेध इत्युत्तरमुक्तम्, तदसङ्गतम्। “रुद्रभुक्तं भुञ्जीत रुद्रपीतं पिबेत्, रुद्राघ्रातं जिघ्रेत्, रुद्रेणात्तमश्नन्ति, रुद्रेण पीतं पिबन्ति, रुद्राघ्रातं जिघ्रन्ति, तस्माद् ब्राह्मणाः प्रशान्तमनसो निर्माल्यमेव भक्षयन्ति” इति जाबालोपनिषद्वचनाद् विष्णुनिवेदितान्नग्रहणविधिवत् शिवनिर्माल्यग्रहणस्याप्यवगमात्।

“पुष्पं फलं सुगन्धं च वस्त्राण्याभरणानि च।
शिवार्पितानि स्वीकुर्य्याद् अन्यथा किल्बिषी भवेत्॥
शिवाय शिवनिर्माल्यं गृहीतेव शिवद्विजात्।
स्वयमेवाददानस्तु नरकं प्रतिपद्यते॥”

इति लिङ्गपुराणाच्च तदवगमात्,—

“भक्ष्यमन्नं प्रयत्नेन निवेद्याश्नाति यः सदा।
स भूपालः सर्ववेत्ता भवत्येव हि सर्वथा॥
अतीतानागतं ज्ञानं भूपालत्वं च शाश्वतम्।
जातिस्मरत्वं सौन्दर्य्यं मन्नैवेद्यस्य भक्षणात्॥
ब्रह्मचारिगृहस्थानां यतीनां च विमुक्तिदम्।
निर्मलत्वाच्च निर्माल्यं नृणां नैर्मल्यकारणम्॥”

इति ब्रह्माण्डपुराणात् तदवगमाच्च। न चैवं सति

“वरं विषमपि प्राश्यं शिवस्वं नैव भक्षयेत्।
विषमेकाकिनं हन्ति शिवस्वं पुत्रपौत्रिकम्॥”

इत्यादिसौरपुराणादिवचनानां का गतिरिति वाच्यम्।

“देवस्वं देवताद्रव्यं निवेद्यं च निवेदितम्।

चण्डद्रव्यं वहिः क्षिप्तं निर्माल्यं षड्विधं तथा ॥"

इति नारदवचनादवगत-षड्विधनिर्माल्यमध्ये निवेदितातिरिक्तपञ्चविधनिर्माल्यविषयकतायाः,—

"देवस्वं ग्राम्यभूम्यादिदासीदासचतुष्टयम्।
हेमरूप्यकवस्त्राणि देवद्रव्यमिति स्मृतम्॥
यत्सङ्कल्प्य च देवाय पत्रं पुष्पं फलं जलम्।
अन्नपानादि तत्सर्वं निवेद्यमिति कीर्त्तितम्॥
एतत्त्रिविधनिर्माल्यम् अनर्हमिति कथ्यते।
शिवोपभुक्तं स्रग्गन्धम् अन्नपानादिकं तथा॥
निवेदितमिति प्रोक्तं सर्वपापहरं परम्।
निर्माल्ये षड्विधे भोज्यम् एकमेव निवेदितम्॥"

इति नारदीयवचसोऽवगमात्। एतेन हिंसायाः प्रत्यवाया-प्रत्यवायजनकत्वदृष्टान्तेन निषेधानां सामान्यतो विष्ण्वतिरिक्त-देवनिवेदितान्नविषयकत्वं ब्रुवन्तो दग्धाङ्गाः परास्ता इति तत्-खण्डनमिति।

व्या० अत्रास्माभिः विष्णुनिवेदितान्नादिस्वीकारे बहूनि प्रमाणानि उपन्यस्तानि। अतस्तत्स्वीकारपरत्वं तेषां वचनानामुक्तम्। भवद्भिरपि शिवनिर्माल्यभोजने भवद्दृष्टानि प्रमाणानि उपन्यस्तानि। तानि भवदुक्तश्रुतिस्मृत्यादीनि प्रमाणान्युपजीव्यास्माभिर्विष्णुनिवेदितमिव वैष्णवैः शिवनिवेदितमपि भवद्भिः शैवैः स्वीकर्त्तव्यम्, न तत्रास्माकं काचिद् हानिः। किन्त्वियान् विशेषः, वैष्णवैः शिवनिर्माल्यभक्षणं न कर्त्तव्यम्। उक्त-

निषेधवचनप्रामाण्यात् शैवैस्तु शिवनिवेदितमिव विष्णुनिवेदितमपि स्वीकर्तव्यं, तत्र निषेधवाक्याभावात् शैवैस्तत्स्वीकारदर्शनात्। यदि निषेध-वचनाभावेऽपि स्वेच्छयैव वैष्णवाचारं पश्यद्भिः विष्णुनिवेदितं त्यज्यते, तदा भवतु तदपि, तथापि ये वैष्णवशैवदीक्षाशून्याः स्मार्ताः शिष्टपदव्यपदेश्याः भस्मरुद्राक्षादिधारिणोऽपि काश्यादिषु किं बहुनाऽऽसेतुहिमाचलं वर्तमानाः किं कुर्वन्ति, किं विष्णुनिवेदितं, वा शिवनिवेदितं, वोपयुञ्जन्ति, किं वा त्यजन्ति। अत्र शिष्टाचारः कीदृश इति विमर्शनीयम्। यदि भवदुक्तप्रमाणानुसारेण शिवनिवेदितमपि उपयुञ्जन्ति, तदा भवदुक्तं प्रमाणम् अन्यथा न प्रमाणम्। यदि अस्मदुक्तप्रमाणानुसारेण विष्णुनिवेदितमुपयुञ्जन्ति, शिवनिवेदितं च त्यजन्ति, तदाऽस्मदुक्तं प्रमाणम्। धर्मज्ञसमयः प्रमाणं वेदाश्च आचारश्चापि साधूनामित्यादिना शिष्टाचारस्यापि प्रामाण्यावगमात्, तदा भवदुक्तानां वचनानां जर्तिलयवागूहोमविधायकवाक्यानामिव गतिः कल्पनीया। तत्र हि "जर्तिलैर्जुहोति यथा वा जुहोति" इति होमं विधाय "स ग्राम्यान् पशून् हिनस्ति स आरण्यान्" इत्यादिना जर्तिलयवागूहोमं विनिन्द्य "अजक्षीरेण जुहोति" इति होमविशेषो विहितः। तत्राप्राप्तजर्तिलयवागूहोमविधानं च अजाक्षीरहोमप्रशंसार्थमिति प्रामाणिकानां पन्थाः। यदि विष्णुनिवेदितग्रहणेऽपि निषेधप्रमाणमुपलभ्येत तदोभयोरपि शैववैष्णवाधिकारिभेदेन व्यवस्था कल्पनीयोभयदीक्षाशून्यास्तु अस्मत्पक्षपातिनो न

युगत्यपक्षपातिनः। यत्तु दग्धाङ्गा इत्यादिना क्रोधमावेशारैक्त तत्र न वयं कुप्यामः प्रकृत्यनुरूपत्वाद्वचनानाम्।

प्रश्न० देवतान्तरनिवेदितं वस्तु ग्राह्यं न वा ?

दुर्ज० इत्यष्टमं वाक्यं दत्तोत्तरमिति।

टी० पूर्वप्रश्नस्योत्तरेणैव शिवशक्त्यादिनिवेदितस्याग्राह्यत्वमुक्तवताऽस्य प्रश्नस्याप्युत्तरस्य जातत्वादिति भावः।

सज्ज० इति रामानुजीयाः, यत्तु देवतान्तरनिवेदितं वस्तु ग्राह्यं न वेत्यस्मत्प्रश्नो दत्तोत्तर इत्येतन्न ग्राह्यमित्यर्थकमुक्तं तदप्यसङ्गतम्। उक्तस्मृतिप्रामाण्येन देवतान्तरनिवेदितान्नग्रहणस्योक्तत्वादित्यलमिति तत्खण्डनमिति।

व्या० उक्तप्रमाणानां जर्तिलयवागूहोमविधिवाक्यानामिवान्यथासिद्धेरुक्ततया भवदुक्तखण्डनं खण्डितं वेदितव्यमिति।

प्रश्न० भवन्मार्गे तिलकं कीदृशं केन द्रव्येण कर्तव्यम् ?

दुर्ज० इति षष्ठः प्रधानप्रश्नः, तत्रेदमुत्तरम्,—

"नमस्कृत्वा ततः शिष्यो गुरुं सर्वगुणान्वितम्।
तदा प्रभृति शुभ्राणि नित्यं पुण्ड्राणि धारयेत्॥
आदाय वैष्णवक्षेत्रात् मृत्तिकां विपुलां शुभाम्।
मूलमन्त्रेणाभिमन्त्र्य चोर्द्ध्वपुण्ड्राणि धारयेत्॥
ललाटादिषु चाङ्गेषु केशवादीन् यथाक्रमम्।
द्व्यङ्गुलं त्र्यङ्गुलं वापि सान्तरालं प्रकल्पयेत्॥
आभ्रुवोर्द्व्यङ्गुलं पार्श्वं ललाटान्तं तु विन्यसेत्।

पूर्वं सर्वाणि पुण्ड्राणि सच्छिद्राण्येव कारयेत् ॥
तस्माच्छिद्रान्वितं पुण्ड्रं ब्राह्मणः सततं वहेत् ।
सन्ध्याकाले जपे होमे स्वाध्याये पितृतर्पणे ।
श्राद्धे दाने च यज्ञे च धारयेत् ऊर्द्ध्वपुण्ड्रकम् ।
ऊर्द्ध्वपुण्ड्रं तु विप्राणां सन्ध्यानुष्ठानकर्मवत् ॥
श्राद्धकाले विशेषेण कर्ता भोक्ता च न त्यजेत् ।
सर्वैः श्वेतमृदाकार्य्यमूर्द्ध्वपुण्ड्रं यथाविधि ॥
ऋजूनि सान्तरालानि अङ्गेषु द्वादशेष्वपि ।
प्रशस्ते पर्वताग्रादौ जातया श्वेतमृत्स्नया ॥
उच्चार्य्य केशवादीनि नामान्यङ्गे यथाक्रमम् ।"

इति स्मृति-पञ्चरात्रादिवचनोक्तप्रकारेण श्वेतमृत्तिकाद्रव्येण श्रीवैष्णवैरिदानीं क्रियमाणविन्यासविशेषयुक्तं तिलकं कर्तव्यमिति । तथा च श्रुतिरथर्वणे "हरेः पादाकृतिमात्मनो हिताय मध्ये छिद्रमूर्द्ध्वपुण्ड्रं यो धारयति, स परस्य प्रियो भवति, स मुक्तिभाग्भवति" इति तथा शतपथे "अथ कात्यायनेति होवाच परं ब्रह्मेति एकदेवो विश्वतश्चक्षुरिति विश्वात्मा विश्वतो बाहुरुत स एष पुरुषोऽन्तर्य्यामोऽन्तर्य्यामः विश्वतोमुखः सर्वात्मा विश्वतः स्यादिति नारायणाद् ब्रह्मा जायते, नारायणाद् रुद्रो जायत इति संबाहुभ्यां नमति संपतत्रैर्द्यावाभूमी जनयन् देव एकः पुरुषोऽन्तर्य्यामोऽन्तर्य्यामः स आदित्यस्तेजो भवति, स विष्णुरेव भवति, स विष्णुलोको भवति, तप्तं चक्रं द्विभुजे धार्य्यमित्यग्निहोत्रलोको भवति, ऊर्द्ध्वपुण्ड्रमालिखेत् तस्मादि-

रेखं भवति, भूः स्वयं भूर्ब्रह्मणः सायुज्यं सलोकतां जयति य एवं वेद। अथ कात्यायनेति होवाच, आदित्यः पुरुषः स आदित्यः कस्मिन् प्रतिष्ठितं चाध्यात्मं च प्रतिष्ठितं वेद प्रतितिष्ठति प्रजया पशुभिः यस्मिन् लोकेऽमृतत्वमेत्यपापः पापं हरति, सुदर्शनं ध्यायति, ऊर्द्ध्वपुण्ड्रं द्विरेखं भवति, ब्रह्मणः सायुज्यं सलोकतां जयति, य एवं वेदेत्यादिकेति।"

टी० "नमस्कृत्वा ततः शिष्यः" इति ततस्तापसंस्कारानन्तरं सन्ध्यानुष्ठानकर्मवदिति नित्यमिति भावः। सर्वैः चातुर्वर्णिकारिभिर्वैष्णवैरित्यर्थः। अत्रोदाहृतश्रुतिवाक्यानि परिकरविजये श्रीमदाचार्य्यैरुदाहृतानामन्येषामपि श्रुतिवाक्यानामुपलक्षणानि अर्थश्चाकरेषु द्रष्टव्यः।

सत्त्व० इति रामानुजीयाः, यत्तु भवन्मार्गे तिलकं केन द्रव्येण कीदृशं कर्तव्यमित्यस्मत्प्रश्नोत्तरे प्रवृत्तैरङ्किकैरुक्तम्। तच्चेदमुत्तरम् इत्यारभ्येत्यादिकेत्यन्तकम्, तदसङ्गतम्।

"धार्य्यं भस्म त्रिसन्ध्यं च गृहिणा जलसंयुतम्।
सर्वकालं भवेत् स्त्रीणां यतीनां जलवर्जितम्॥
वनस्थव्रतिकन्यानां दीक्षाहीननृणां तथा।
मध्याह्नात् प्राग्जलैर्युक्तं परतो जलवर्जितम्॥
सर्वदा सजलं भस्म त्रिपुण्ड्रेणैव धारयेत्।
त्रिपुण्ड्रं सजलं धृत्वा नरः पूजां करोति यः॥
शिवपूजाफलं साङ्गं तस्यैव च सुनिश्चितम्।
मुमुक्षुर्वा बुभुक्षुर्वा द्विजेन्द्रः शुद्धवैदिकः॥

धारयेत् सादरं नित्यं भस्म वेदोक्तमार्गतः।
वेदोक्तेनैव मन्त्रेण सितं भस्माग्निहोत्रजम्॥
धारयेत् वैदिकः प्राज्ञस्त्रिपुण्ड्रं धूलनात्मना।
तिर्य्यक् त्रिपुण्ड्रं मुक्तिकं पुरुषार्थैकसाधनम्॥
पुण्ड्रान्तरं भ्रमाद्वापि वैदिको नैव धारयेत्।
पुण्ड्रान्तरं कदाचिद्वाप्यश्रौतं शुद्धवैदिकः॥
धारयेत् यदि मोहेन पतत्येव न संशयः।"

इत्यादिस्मृतिसंग्रहसूतसंहितास्थवचनकदम्बैरूर्द्ध्वपुण्ड्रनिषेधपूर्वक भस्मना त्रिपुण्ड्रधारणस्यैवावगमात्। न चोर्द्ध्वपुण्ड्रस्याश्रौतत्वं कथमिति वाच्यम्,

"अश्रौतमूर्द्ध्वपुण्ड्रादि ललाटे श्रद्धया तु ये।
धारयिष्यन्ति वा मूढा! युगान्ते समुपस्थिते॥"

इत्यादिवसिष्ठलैङ्गे नवमाध्याये अश्रौतमिति विशेषणेनावगमात्। न च,

"अशुचिर्वाप्यनाचारो मनसा पापमाचरेत्।
शुचिरेव भवेन्नित्यम् ऊर्द्ध्वपुण्ड्राङ्कितो नरः॥"

इत्यादिब्रह्माण्डपुराणीयवचनानां का गतिरिति वाच्यम्, निरुक्तपुराणात् स्फुटोर्द्ध्वपुण्ड्रस्याश्रौतत्वावगत्या तस्य द्विजेतरविषयत्वात् त्रिपुण्ड्रातिरिक्त-तत्तदाकारबोधकवाक्यानां भवाद्दृशकल्पितत्वेनाप्रामाणिकत्वाच्च शंखचक्रादिधारणवाक्यानामपि

"एकजातेरयं धर्मो न जातुः स्याद्विजन्मनः।"

इति स्मृत्या शूद्रविषयकत्वस्यावगमाच्च तदुक्तश्रुतीनामथर्वण-

वेदादिष्वनुपलम्भेन भवत्कल्पितत्वस्यावगत्याऽप्रामाणिकत्वाच्चे-
त्यलमतिविस्तरेणेति तत्खण्डनमिति।

व्या० भवदुक्तप्रश्नस्य भवन्मार्गे इत्यादेरुत्तरे प्रवृत्तैः,

"मृत्तिकेह न मे पापं यन्मया दुष्कृतं कृतम्।
मृत्तिके! देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम्॥"

इति श्रुत्या स्तुतेन मृद्द्रव्येण कल्पितेनोर्द्ध्वपुण्ड्राङ्कितैरुक्तैरुक्तस्य दूषणे प्रवृत्तैः "अग्नेर्भस्मासि अग्नेः पुरीषमसि" इत्यादिश्रुत्या स्तुतेन भस्मना कृतेन तिर्य्यक् पुण्ड्रेणाङ्कितैरुक्तं तन्न समीचीनम्। धार्य्यं भस्म त्रिसन्ध्यमित्यारभ्य "पतत्येव न संशयः" इत्यन्तमुक्तानां स्मृतिसंग्रह-सूतसंहितावचनानां तन्मध्यपठितेन,—

"त्रिपुण्ड्रं सजलं कृत्वा नरः पूजां करोति यः।
शिवपूजाफलं साङ्गं तस्यैव च सुनिश्चितम्॥"

इति वचनेन सम्यगवबोधितशैवाधिकारिपरत्वकानां शैववैष्णव-साधारणसर्वाधिकारिविषयकत्वासम्भवात् वैष्णवाधिकारिविषयाणां प्रमाणात्,—

"तिर्य्यक् पुण्ड्रधरो विप्रः पङ्क्तिमध्ये स्थितो यदि।
सा पङ्क्तिर्ब्रह्महत्यायां योज्यते नात्र संशयः॥
सम्यक् कृत्वा ललाटे तु ऊर्द्ध्वपुण्ड्रं पुनः स्वयम्।
यश्छिनत्ति त्रिपुण्ड्रेण स पापी श्वपचाधमः॥"

इत्यादिस्मृतिवचनानां,—

"कुलीनो ब्राह्मणो विद्वान् भस्मधारी भवेत् यदि।
वर्जयेत् तादृशं देवि! मद्योच्छिष्टघटं यथा॥"

इत्यादिवराहवचनानां,—

"यो विना चोर्द्ध्वपुण्ड्रेण यत् कुर्य्यात् कर्म वैदिकम्।
निष्फलं तस्य तत्कर्म भस्मन्येवाहुतिर्यथा॥"

इत्यादिमात्स्यवचनानां च "यश्छिनत्ति त्रिपुण्ड्रेण" इतिवाक्यावरोधितवैष्णवाधिकारित्वकानामपि सर्वविषयत्वापत्तेः। यत्तु न चेत्यादिशंखचक्रोत्तरम् "अश्रौतमूर्द्ध्वपुण्ड्रादि" इत्यादि तदसङ्गतम्। तेन वचनेनोर्द्ध्वपुण्ड्रादेरश्रौतत्वस्य तद्धारणे कलियुगधर्मत्वस्य च विधाने वाक्यभेदापत्तेः। ये तुभ्यामश्रौतत्वे विधिशक्तिकुण्ठनाच्च, किन्तु ये पुरुषाः श्रुत्यबोधितम्। कलिकालीय-स्वधर्मैकप्रयोजनकमार्गविशेषकल्पितमूर्द्ध्वपुण्ड्रधारयिष्यन्तीत्यर्थोऽस्य वक्तव्यः। अतोऽस्मत्सम्प्रदायिभिः क्रियमाणस्योर्द्ध्वपुण्ड्रस्य नाश्रौतत्वमवगम्यते। यत्तु न चेत्यादि द्वितीयशङ्कायां निरुक्तेत्यादिनोत्तरमुक्तं तदप्यसङ्गतम्। निरुक्तवचनेन सोपपत्तिकमस्मदुक्तार्थकेणाश्रौतत्वावगत्यसम्भवात्। साक्षाद्द्विजाधिकारिबोधक-ब्राह्मणादिपदघटितानां द्विजेतरविषयकत्वासम्भवाच्च अन्यथास्मदुक्तवचनानुगुण्येन भवदुक्तस्कन्दसंहितादिवचनानामेव द्विजेतरविषयकत्वसम्भवात्। यत्तु त्रिपुण्ड्रातिरिक्तेत्यादिकं तत्प्रमाणसमन्वयानभिज्ञजनभाषितम्। भस्मत्रिपुण्ड्रबोधकवाक्यानां सर्वेषां शैवाधिकारिधर्मबोधकानां भवत्कल्पितत्वस्य वक्तुं सुवचत्वात्। यत्तु शंखचक्रादिधारणवाक्यानामपीत्यादिकं तदसमीचीनम्।

"शंखचक्राद्यङ्कनं च नृत्यगीतादिकं तथा।

एकजातेरयं धर्मो न जातु स्याद्द्विजन्मनः।"

इति स्मृतिवचनस्य नायमर्थो यच्छंखचक्राद्यङ्कनं नृत्यगीतादिकं च शूद्रस्य धर्मो न द्विजातेरिति, किन्तु शंखचक्राद्यङ्कनपूर्वकं नृत्यगीतादिकं हि इदानीमपि वैष्णवमन्दिरेषु शूद्रजातीयैर्दासीदासैर्जीविकार्थं क्रियते। एवं शैवमन्दिरेषु शिवचिह्नाङ्कनपूर्वकं नृत्यगीतादिकं तैः क्रियते। तस्य वृत्तिहेतुभूतस्य शूद्रधर्मत्वप्रतिपादकमिदं वचनम्, श्लोकस्यायमर्थः। शंखचक्रादीत्यादिपदेन शिवलिङ्गं गृह्यते। चकारो हि उभयोः समुच्चयार्थः। तथा शब्देन नृत्यगीतादेः शंखचक्राद्यङ्कनपूर्वकत्वमवगम्यते। अन्यथा यथा शंखचक्राद्यङ्कनं, तथा नृत्यगीतादिकमिति विवक्षा तु न सम्भवति, शंखचक्राङ्कनस्यैकजातिधर्मत्वस्य प्रमाणान्तरेणानवगतत्वात् दृष्टान्तत्वासम्भवात् न जात्विति आपद्यपीत्यर्थः। यथा ब्राह्मणानामापदि वृत्त्यर्थं शस्त्रधारणादिक्षत्रियधर्मः कृष्यादिवैश्यधर्मश्चोपादेयो भवति, तथा द्विजातीनामापद्यपि शंखचक्राद्यङ्कनपूर्वकं नृत्यगीतादिकं नोपादेयं वृत्त्यर्थमिति जातुपदाभिप्रायः। एवमर्थाभावे नारदादीनामप्येकजातित्वापत्तिः। यत्तु तदुक्तश्रुतीनामित्यादिकमुक्तं तदसङ्गतम्। भवत्समीपे सर्वाथर्वणशाखाग्रन्थस्याभावात्। किंच यज्ञोपवीतमिति मन्त्रस्य यज्ञोपवीतधारणे विनियुक्तस्याथर्वणिकस्य खिलत्वमभियुक्तोक्तं कथं सङ्गमनीयम्? अन्यथा भवदभिमतार्थविरोध्यर्थप्रतिपादकत्वेनास्मत्कल्पितत्वकल्पने भवदुक्तश्रुतिवचनानामपि भवत्कल्पितत्वस्य सुवचत्वात्। एवं वि-

रोधिवचनानां प्रतिवादिकल्पितत्वमनुद्भाव्य समन्वयं समर्थयन्तः, शङ्कराचार्य्यप्रभृतयो वृथामतिकर्द्दमे प्रविष्टा भवेयुः। किंच नास्तिका म्लेच्छक्षणादयश्च सर्वं श्रुतिस्मृत्यादिप्रमाणजात कल्पितं वदन्तीति कस्ततो भेदस्तदेकदेशस्य कल्पितत्वं वदताम् इत्यलं विस्तरेण।

प्रश्न० तत्र भगवतस्तत्प्रियायाश्च कीदृशं विधानमिति वक्तव्यम्।

दुर्ज० इति तदवलम्बिनामष्टवाक्यानां मध्ये प्रथमं वाक्यम्, तत्रेदमुत्तरम्। भगवतस्तत्प्रियायाश्च विधिपरतन्त्रत्वाभावात् न किञ्चिद्विधानमस्ति। अतो द्रव्यनियम आकारनियमादिकोऽपि नास्ति, किन्तु किरीटग्रैवेयक-कुण्डलाद्याभरणजालवच्छोभार्थं-मूर्द्धपुण्ड्रादिकमपि धार्य्यते। रत्नेन स्वर्णेन रूप्येण मृगमदेन काश्मीरेण वा यथाविभवं यथाभक्तरुचिमृत्तथा वा तिलकं क्रियत इति विन्यासप्रकारश्च तत्तद्भक्तवासनावासितरीत्यैवेति

टी० स्पष्टोऽर्थः।

सज्ज० इति रामानुजीयाः, भगवतस्तत्प्रियायाश्च कीदृशं विधानमिति प्रश्नस्यापि तयोर्विधिपरतन्त्रत्वाभावात् तद्विधानाभावेनेदृशमेवानेनैवेति नियमाभावेऽपि यथाभक्तरुचि येन केनचिद्विभवाऽनुसारिणा द्रव्येणोर्द्ध्वपुण्ड्रादि धार्य्यते इत्युत्तरमुक्तं तदसङ्गतम्। अभेदभावनयैव यतितव्यम्, "देवो भूत्वा देवं यजेत्" इत्यादिसिद्धान्तेनोपासकेन स्वस्मिन्नुपास्याभेदमारोप्योपासनं कर्तव्यमिति बोधनात् स्वस्य विधिपरतन्त्रत्वे उपा-

स्वार्थत्वारोपिताभेदकदेवताया अपि विधिपरतन्त्रत्वस्य बोधत्वात्। न च तेन सिद्धान्तेनोपास्यदेवताभेदस्योपासके बोधनेऽपि विधिपरतन्त्रोपासकाभेदस्योपास्य-देवतायामबोधनात् कथं देवताया विधिपरतन्त्रत्वमिति वाच्यम्, उपासकस्यत्युपास्यावधिकाभेदबोधने उपास्यस्यत्युपासकावधिकाभेदबोधनस्यार्थलभ्यत्वात्। न च तेन सिद्धान्तेनोपास्यावधिकाभेदस्याप्यर्थतोबोधने उपास्यदेवतासम्बन्धिविन्यासविशेषविशिष्टतिलककर्मकविधानस्य शास्त्रेणाबोधनात् उपास्यदेवताया अबोधितनिरुक्ततिलकविधानकर्तृत्वमिव तदभिन्नोपासकस्यापि बोधिततिलकविधानकर्तृत्वापत्तिरिति वाच्यम्, उक्तयुक्त्योपास्यदेवतासम्बन्धितिलके शास्त्राबोधितत्वस्यासिद्धेः। न च व्यङ्ग्यमर्यादया देवतासम्बन्धितिलकविधानबोधनस्य किं प्रयोजनमिति वाच्यम्, उपासके सात्विकत्वाविर्भाव एवेत्यवेहि तस्मादुपासकसम्बन्धिद्रव्यविशेषविन्यासविशेषघटिततिलकविधानस्य विधिपरतन्त्रत्वद्वारोपासकस्य विधिपरतन्त्रत्ववद्भगवतस्तत्प्रियाया अपि विधिपारतन्त्र्यमेवेति नातो द्रव्यनियम इत्यारभ्य भक्तवासनावासितरीत्यैवेत्यन्तकं यदुक्तमङ्कितैस्तद्गगनकुसुमायमानम्। न च तेन सिद्धान्तेनोपासके सात्विकत्वाविर्भाव एव व्यङ्ग्यमर्यादया बोध्यते, न तूपासकसम्बन्धिशास्त्रबोधिततिलकविधानमप्युपास्ये तथा च कथं भगवतो विधिपरतन्त्रत्वमिति वाच्यम्, श्रुतिस्मृत्यनुकूलानुष्ठानकर्तृशिष्टाचारमात्रेण शास्त्रे साक्षादनुक्तस्यापि उपास्यदेवतासम्बन्धितिलकस्य दर्शनेनोक्तसिद्धान्तस्य

तथापि तात्पर्य्यावगत्या भगवत्सम्बन्धितिलकस्यापि विधिपरतन्त्रत्वादित्यलम् इति तत्खण्डनम् इति ।

व्या० अत्र भगवतस्तत्प्रियायाश्चेत्यारभ्येत्यारभ्येत्यन्तमुक्तमित्यन्तेन प्रश्नोत्तरे अनूद्य तदसङ्गतमिति प्रतिज्ञाय तदुपपादनार्थमभेदभावनयेत्यारभ्य तत्खण्डनमित्यन्तं यदुक्तं तदिदं महत्प्रहसननाटकम् । अनेन शिवोपासकैर्भवद्भिर्निर्गुणस्य शिवनाम्नो भगवतः उपासकवृत्तिसंसारित्वमापादयता वचनेन शिवस्य सम्यक् पूजनं कृतम् । संसारित्वाज्ञत्वादिकमुपहारः समर्पितः उपासके उपास्याभेदारोपमात्रेणोपास्यवृत्तिजगत्सृष्ट्यादिकर्तृत्वमपि स्वस्मिन्नागतमिति भवन्तः । इदानीं जगत्स्रष्टारो जाताः उपासनार्थस्वारोपिताभेदकदेवतापि स्वरच्या जातेति भवन्तो देवतामपि स्वोपास्यां मोक्षभागिनीं कुर्य्युः । मनो ब्रह्मेत्युपासीतेत्यादिप्रतीकोपासनादौ न मनोवृत्ति जड़त्वादिकं ब्रह्मणि केचिदारोपयन्ति । किं चोपासनार्थं स्वस्मिन्नुपास्याभेदारोपेऽपि ब्रह्मत्वनित्यमुक्तत्वादिकमारोपितं भवतु न तावता नित्यमुक्त एवोपासको भवितुमर्हति, तथा सत्युपासनाप्रारम्भात् प्रागेवोपासकस्य नित्यमुक्ततयोपासनां किमिति कुर्य्यात् । एवमुपास्येऽपि दैवते उपासकाभेदभावनया संसारित्वविधिपरतन्त्रत्वादिकमारोप्यत इत्येव वक्तव्यम्, न तु जन्यत इति । अन्यथोपासकस्योपास्यदेवतायाश्च वास्तविकसंसारित्वाविशेषात् विधिपरतन्त्रत्वाच्च कः कस्य मुक्तिप्रद इति महतीयमापत्तिः आरोपितविधिपरतन्त्रत्वं न तिलकविधानादिप्रयोजनम् । अन्यथा-

रोपितसर्पदंशनादिकमपि मरणकारणं स्यात्। एवं यस्य यस्य कर्मण उपासनस्य वा यद्यत्फलं तत्स्वस्मिन्नारोप्य सर्वोऽपि सुसुखं तिष्ठेदिति शास्त्रमात्रस्याननुष्ठानप्रयुक्तमप्रामाण्यं स्यात्। किं चोपासकसंसार्य्यात्मवृत्तिविधिपरतन्त्रत्वादीनां 'न मां कर्माणि लिम्पन्ति' इत्याद्युक्ते निर्लेपे नित्यमुक्ते भगवत्युपास्यदेवते सौष्ठवत्वाभिधानं भवतामेव शोभते। किं च बहुकालाऽनुष्ठानाधीनसिद्धिकेनोपासनेनोपास्यदेवताप्रसादादुपास्यवृत्तीनाम् "अपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः" इत्याद्युक्तानां गुणानां चिरायाविर्भावो भवतीति संपद्याविर्भावः स्वेन शब्दादिति श्रीवेदव्यासेनोक्तम्। भवद्भिस्तु उपासनारम्भात् प्रागेवोपासनार्थयाऽभेदभावनयैवोपासककर्तृकयाऽनायासेनैवोपास्यदेवताया विधिपरतन्त्रत्वादिमहाफलाविर्भावो भवतीत्युच्यते। न चेत्यादिना कृते शङ्कासमाधाने भवतामेव समुचिते उपासके उपास्याभेदभावनयैवोपास्ये उपासकाभेदभावनासिद्धौ तादृशोपासनमनर्थकारणमेव स्यात्। अपकृष्ट उत्कृष्टबुद्धिः खलु श्रेयसे भवति, तथैव प्रतीकोपासनादावभियुक्तैरुक्तत्वात् उत्कृष्टेऽपकृष्टबुद्धिरनर्थकारणम्। भृत्ये राजबुद्ध्या क्रियमाणोपचारादिर्हि राजभृत्ययोः प्रसादमुत्पाद्य फलाय भवति, राज्ञि निकृष्टभृत्यबुद्ध्या क्रियमाणोपचारः शूलारोपणस्यैव हि कारणं दृष्टम्। यत्तु न च तेन सिद्धान्तेनोपास्यावधिकाभेदस्याप्यर्थतो बोधन इत्यादिकमित्यादिशङ्कासमाधानमपि महदुपहास्यम्। पूर्वमुपासक उपास्याभेदभा[illegible]योपास्य

उपासकाभेदोऽपि अर्थात् सिध्यतीत्युक्तम् । इदानीमुपास्या-वधिकाभेदस्यार्थतो बोधने इत्युच्यते, किमियमुन्मादप्रयुक्ता वा पित्तास्वास्थ्यप्रयुक्ता वोक्तिरिति न ज्ञायते । किं च घटो मृदिति प्रत्यक्षेण मृद् घटाभेदस्य प्रत्यक्षसिद्धत्वेऽपि न हि मृदि दृश्यमानं जलाहरणानर्हत्वं घटे परिदृश्यमानं घटानुपादानत्वं वा घटे मृदि वापाद्यते, मनस्विना समाधानमप्यस्य पूर्वपक्षस्य

"यादृशी शीतला देवी तादृशः खरवाहनः ॥"

इति न्यायमवलम्बते उपासकस्य शास्त्रेण तिलकविधानबोधने तदभेदारोपस्यार्थतः प्राप्तिमात्रेणोपास्यदेवताया अपि तिलक-विधानमपि किं शास्त्रेण बोधितमेव । न च व्यङ्ग्यमर्य्यादयेत्या-दिकमपि न सत् । अत्र केन कस्य व्यञ्जना ? व्यञ्जना हि शब्द-वृत्तिरालङ्कारिकैरङ्गीकृता । नात्र कश्चिच्छब्दो व्यञ्जनानिरू-पक उपलभ्यते, शब्दाभावे कथं लक्षणादेरिव व्यञ्जनाया उप-पत्तिः गङ्गायां घोष इत्यत्र गङ्गापदेन तीरलाक्षणिकेन घोष-वृत्ति शैत्यपावनत्वादिकं बोध्यते । व्यञ्जनया स्वायत्त इति न्यायेन गङ्गातीरे घोष इति वक्तव्ये गङ्गायां घोष इति वदत-स्तादृशतात्पर्य्यावधारणात् । प्रकृते कुत्रार्थे कं शब्दं प्रयुञ्जानस्य देवतासम्बन्धितिलकविधाने तात्पर्य्यं ज्ञायते, येन तत्र व्यञ्जना स्यात् । एवं शक्यार्थव्यञ्जना लक्ष्यार्थव्यञ्जना व्यङ्ग्यार्थव्यञ्जना वा न सम्भवति, तदुदाहरणानि ग्रन्थविस्तरभिया न लिख्यन्ते । एवं उपास्यदेवतायास्तिलकविधानप्रयोजनम् उपासके सात्त्विक-

त्वाविर्भाव इति वचनं वन्ध्याप्रसववेदनस्य प्रयोजनम् बलीवर्दस्य वत्सोत्पत्तिरिति वचनवदत्यन्तोपहास्यम्। तस्मादित्याद्युपसंहारोऽपि उन्मत्तप्रलापवदनन्वितार्थक इति किं तत्र वक्तव्यम्। उपासकसम्बन्धिद्रव्यविशेषविन्यासविशेषघटिततिलकविधानं हि उपासकस्य विधिपारतन्त्र्यमवगमयतु नाम तदपि न कस्यचित् विधिपारतन्त्र्यद्वारा। तच्च कथं भगवतस्तत्क्रियायाश्च विधिपारतन्त्र्यमवगमयेत्। अत इत्यादिकमपि तुच्छम्। मध्येन चेत्यादिना काञ्चिच्छङ्कां कृत्वा श्रुतिस्मृतीत्यादिना यत्समाधानं तदतीव साहसकृतम्। उपास्यदेवतस्य तिलककर्तृशिष्टाचारमात्रेण शास्त्रे साक्षादनुक्तस्यापि तिलकस्य दर्शनेन तत्रापि विधिपरतन्त्रत्वकल्पनेऽन्नजलादिनिवेदनशिष्टाचारदर्शनेन शास्त्रप्रतिषिद्धाशनाय पिपासाधनापादीनामपि कल्पना स्यादिति किं दिष्टहतदण्डाभिघातेनेत्यलमिति।

प्रश्न॰ तत्तद्द्रव्यभेदेषु च किं प्रमाणम्।

दुर्ज॰ इति तृतीयं वाक्यम्।

प्रश्न॰ आकारभेदे च किं प्रमाणम् ?

दुर्ज॰ इति चतुर्थं वाक्यम्, तयोरिदमुत्तरम्। न ह्यस्मत्सम्प्रदायिनां तिलके द्रव्यभेद आकारभेदो वास्ति इति। तत्र वयं न पर्य्यनुयोज्याः, यद्यन्येषां द्रव्यभेदो वाकारभेदो वास्ति, तर्हि त एव प्रष्टव्याः। न ह्यस्माभिः सर्वेषां तिलकोपादानद्रव्येषु तदाकारभेदेषु च प्रमाणमुपन्यसनीयमितीत्थं राद्धेति।

टी॰ स्पष्टोऽर्थः।

मूल॰ इति रामानुजीयाः, तत्तद्द्रव्यभेद आकारभेदे च किं प्रमाणमिति प्रश्नयोरस्मत्सम्प्रदायिनां तिलकेषु द्रव्यभेद आकारभेदश्च नास्तीत्युक्तं तदसङ्गतम्। सम्प्रदायचतुष्टयसाधारणेन क्वतस्य प्रश्नस्यैतदुत्तरत्वासम्भवात् भवत्स्वपि तेङ्गलवड़-कलभेदेन तिलकघटकद्रव्यभेदाकारभेदस्य दर्शनाच्च। न च तेङ्गलवड़कलादिभेद ऐच्छिको न शास्त्रीय इति वाच्यम्, त्रैवर्णिकोचितत्रिपुण्ड्रभस्मरुद्राक्षधारणस्य शास्त्रीयस्य भवता तावदेव परित्यक्ततया भवतां सर्वकर्तव्यस्यैवेच्छिकत्वादित्यलम् इति तत्खण्डनमिति।

व्या॰ अस्मदुक्तं प्रश्नद्वयोत्तरमसङ्गतमिति प्रतिज्ञाय तदुपपादकतया सम्प्रदायचतुष्टयेत्यारभ्य तत्खण्डनमित्यन्तं यदुक्तं तत्तुच्छम्। आदित आरभ्य न सम्प्रदायचतुष्टयसाधारणेन प्रश्न उपलभ्यते, माध्वैरष्टानां महामन्त्राणामुपदेशकरणात् निवार्काणां मते मन्त्राणां न्यूनाधिक्यभावानङ्गीकारात् गुरुपरम्पराप्राप्तत्वेनैव मन्त्रविशेषोपदेशनैयत्यात् तन्मते तत्प्रश्नस्य निर्मूलत्वात् अस्मत्सम्प्रदायेऽवान्तरभेदस्य सत्त्वेऽपि न श्वेतमृद्भिन्नद्रव्येण तिलकं क्रियते, केनापि न वा हरिपादाकृतिभिन्नसंस्थानं वा तिलकं दृश्यते। पीठरचना-तदभावमात्रेण नाकारभेदो वक्तव्यः पीठविधान-तदभावयोरपि शास्त्रीयत्वेन नैच्छिकत्वम्। त्रिपुण्ड्रभस्मरुद्राक्षादिधारणं च न सर्वत्रैवर्णिकोचितं ब्राह्मणादीनां तन्निषेधस्य बहुशास्त्राधिगतत्वात्,

किं तु शैवानामेव तत्सर्वमुचितम्। अन्यथा त्रैवर्णिकोचितत्वे तदुचितश्रुत्यक्षरश्रवणोच्चारणधारणेषु त्रपुजतुभ्यां कर्णप्रपूरणं जिह्वाच्छेदः शरीरभेदश्च शास्त्रविहितप्रायश्चित्तानीव भस्मत्रिपुण्ड्ररुद्राक्षादिकं त्रैवर्णिकोचितं दधानानां शूद्राणां प्रायश्चित्तित्वापत्तिः प्रायशः शूद्राः भस्मादि दधानाः त्रैवर्णिकैरपि तादृशैर्नमस्यन्ते जङ्गमादयः प्रयाजशेषाज्यस्याभिधारणात्मप्रतिपत्तिसंस्कारवत् भगवत्समाराधननिवेदितस्य प्रतिपत्तिसंस्कारतया भगवत्प्रसादमपि स्वीकुर्वतामस्माकमशास्त्रीयैश्चिह्नकाचारस्य कुत्राप्यदर्शनादिति।

प्रश्न० भारतादिमन्वादिस्मृतिषु आचारादर्शाद्याह्निकग्रन्थेषु तिलकविधानं नेति किम्।

दुर्ज० इति पञ्चमं वाक्यम्, तत्रेदमुत्तरम्। भारतादिमन्वादिस्मृतीनां सामान्यधर्मप्रतिपादनैदम्पर्य्येण प्रवृत्ततया तिलकविधानस्य विशेषधर्मान्तर्गततया तत्रानुक्तिः। एवमेव भस्मरुद्राक्षखट्वाङ्गमुद्राविशेषादिधारणमपि मन्वादिस्मृतिभारतादिष्वदृष्टमिति तत्सर्वमप्रामाणिकमित्यनुन्मत्तः कोऽपि न ब्रूयात्। न च "यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्" इति भारतवचनेन भारतदृष्टादन्यस्याप्रामाण्यप्रतीतेर्भवत्सम्प्रदायस्य तथात्वादप्रामाण्यं स्यादिति वाच्यम्, भारते साक्षाददृष्टत्वेऽपि अस्मत्सम्प्रदायस्य शान्तिपर्वणि नारायणीयोपाख्याने पञ्चरात्रस्य बहुतरप्रशंसापूर्वकं महता सन्दर्भेण प्रामाण्यव्यवस्थापनेन पञ्चरात्रैकजीवातोरुक्तप्रायत्वात्। किं चाचारादर्शाद्या-

क्षिकग्रन्थेषु तिलकाप्रतिपादनमुक्तहेतुकमेव। अन्येष्वाह्निकग्रन्थेषु बहुशो विधानदर्शनादिति।

टी० यद्यपि भारतादेः पुरावृत्तप्रतिपादनरूपतयोपमन्युवृत्तान्तादिषु शैवानां विशेषधर्मप्रतिपादनमस्ति, अतः कथं सामान्यधर्ममात्रप्रतिपादकत्वम्, तथापि यद्यदृत्तं तत्सर्वमभिदधतो भारतादेरितिहासस्य न सर्वत्र विधाने तात्पर्य्यम्। अन्यथा भीमसेनादेर्दुःशासनादिरुधिरपानादेर्दुःशासनस्य द्रौपदीवस्त्रापहारव्यापारस्य चाभिधानेन तत्रापि विधानकल्पनापत्तेः, किन्तु यत्र वर्णाश्रमादिसामान्यधर्मप्रतिपादनं तत्रैव तात्पर्य्यमिति भावः। तिलकविधानस्य विशेषधर्मत्वमाह,—तिलकविधानस्येत्यादिना। अथ तिलकविधानातिरिक्तस्यापि तत्र व्यभिचारमाहैवमेवेत्यादिना। अधिकारिभिः भस्मत्रिपुण्ड्रुद्राक्षखट्टाङ्गादिकं धर्त्तव्यमिति विधिवाक्याभावात् पुरावृत्ताभिधानमात्रस्य तद्विधिपरत्वासम्भवस्योक्तत्वाच्चेति भावः। ननु भारते भवत्सम्प्रदायिधर्माणां स्पर्शाभावेन भारतादृष्टस्य सर्वस्याप्रामाणिकत्वस्य भारतीयानुक्रमणिकाध्यायीयवचनादेवावगततया भवत्सम्प्रदायस्याप्रामाण्यमेव सिद्ध्यतीति शङ्कते न चेत्यादिना। भारते यदि सर्वथोक्तिर्नास्ति, तदा तदपि वक्तुं शक्येत तत्तु नास्तीत्यभिप्रायेण समाधत्ते भारते साचादित्यादिना। शान्तिपर्वणीत्युपलक्षणम्। भीष्मपर्वणि युद्धपञ्चमदिनरात्रौ दुर्य्योधनं प्रति भीष्मवचनम्,—

"मा क्षणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः।

सेव्यतेऽभ्यर्च्यते चैव नित्ययुक्तैः स्वकर्मभिः ॥
स्वात्वतं विधिमास्थाय गीतं सङ्कर्षणेन यत् ।"

इति तदपि अस्मत्सम्प्रदायस्य बोधकमिति भावः। किं चेत्यादि ये स्मृतिसंग्रहीतारः, ते सामान्यधर्मं प्रवदन्तो यस्मिन् सम्प्रदाये निष्ठां कुर्वन्ति तत्सम्प्रदायीयविशेषधर्मं केचन प्रतिपादयन्ति। अतएव स्मृतिसार्वभौमोऽपि स्मृतिरत्नाकरकारोऽस्मत्सम्प्रदायासाधारणधर्मं सामान्यधर्मप्रतिपादनमध्ये सोपपत्तिप्रमाणकं प्रत्यपादयत् इति भावः।

यच्च० इति रामानुजीयाः, यत्तु भारतादिमन्वादिस्मृतिषु आचारादर्शाद्याह्निकग्रन्थेषु तिलकं विधानं नेति किमित्यस्मत्प्रश्नोत्तरेऽङ्कितैरुक्तं मन्वादीनां सामान्यधर्मप्रतिपादनाय प्रवृत्ततया तिलकविधानस्य विशेषधर्मान्तर्गततयाऽकथनमिति तत्रोच्यते, किं तावद्विशेषधर्मान्तर्गतत्वं वर्णविभाजकतावच्छेदकधर्मव्याप्यव्याप्यत्वम् उत तत्समानाधिकरणत्वम् ? नाद्यः, ब्राह्मणत्वादिव्याप्यप्रतिग्रहादिकर्तृत्वव्याप्यत्वस्य तिलकविधानेऽभावात् तस्य ब्राह्मणत्वाभाववत्यपि दर्शनात्। न द्वितीयः, तदध्यापनादेरपि मन्वादिभिः प्रतिपादितत्वेन विशेषधर्मान्तर्गतत्वेऽनुक्तित्वाऽव्याप्यत्वस्यावगततयाऽस्मत्प्रश्नस्य तदवस्थत्वात्। यदप्युक्तमेवमेव रुद्राक्षेत्यारभ्य कोऽपि न ब्रूयादित्यन्तकमिति तदप्यसङ्गतम्। मनौ भस्मरुद्राक्षधारणस्यानुक्तत्वेऽपि आदिपदगृहीत-ब्रह्मोत्तरखण्डनारदपुराणसूतसंहितादिषु दर्शनादप्रामाण्यशङ्काया अपि वक्तुमशक्यत्वात्। न चैवं तिलकविधानं

किमिति नेति प्रश्नासाङ्गत्यमिति वाच्यम्, प्रश्नस्य त्रैवर्णिकसाधारण्येनोर्द्ध्वपुण्ड्रविषयकत्वात्। सामान्येन तिलकविषयकप्रश्नासाङ्गत्यमिति वाच्यम्, प्रकरणवशेन सामान्येनोक्तस्यापि विशेषपर्य्यवसानेन तत्सङ्गतेः। यदपि न च यदि हेत्यारभ्योक्तप्रायत्वादित्यन्तकग्रन्थेन स्वसम्प्रदायाभावशङ्का तत्समाधानं चोक्तं तदप्यसङ्गतम्। अपर्य्यनुयोज्योत्तरग्रस्तत्वात् भारतीय-नारदपाञ्चरात्रे शंखचक्राद्यङ्कनाद्युल्लेखाभावाच्च। इदानीन्तनोपलभ्यमानपाञ्चरात्रस्य भवत्कल्पितत्वस्य भारतीयपाञ्चरात्रस्य लुप्तत्वस्य प्रागेवास्माभिरावेदितत्वाच्च। यदपि किं चेत्यारभ्य दर्शनादित्यन्तकग्रन्थेन कुत्रचिदनुक्तत्वेऽपि तिलकविधानस्य नाप्रामाण्यमित्यभिप्रायकत्वमुक्तं तदप्यसङ्गतम्। त्रैवर्णिकानुष्ठेयत्वेन प्रश्नतात्पर्य्यविषयीभूतविन्यासविशेषविशिष्टोर्द्ध्वपुण्ड्रस्य वास्तवस्मृतिपुराणेषु क्वाप्यनुक्ततया दृष्टान्तदार्ष्टान्तयोर्वैषम्यादित्यलमिति तत्खण्डनमिति॥

व्या॰ यत्तु भारतेत्यादिनाऽकथनमित्यन्तेन प्रश्नमस्मत्प्रतिवचनैकदेशं चानूद्य तत्खण्डनार्थं तत्रोच्यत इत्यादिकमुक्तं तत्तुच्छम्। अत्र सामान्यधर्मत्वं नाम स्वव्याप्यतावच्छेदं स्वोद्देश्यतावच्छेदकतावच्छेदकधर्मत्वम्। अनेन मनुष्यसामान्यधर्मस्य सत्यदयादेः त्रैवर्णिकसाधारणस्याध्ययनादेः ब्राह्मणसामान्यधर्मस्याध्यापनादेः क्षत्रिय-वैश्यसामान्यधर्मस्य युद्धगोरक्षणादेः शूद्रसामान्यधर्मस्य सेवादेश्च संग्रहः। विशेषधर्मत्वं नाम वर्णविभाजकतावच्छेदक-धर्मसमानाधिकरण-तत्समानाधिकरणभेदप्रति-

योगितावच्छेदकधर्मत्वम् । तच्च वैष्णवशैवशाक्तधर्म-तदवान्तर-धर्माणामस्तीति तेषां सर्वेषां संग्रहः ।' एतेन किं तावदित्याद्य-स्यानविजृम्भणं दूरतोऽपास्तम् । किं च वर्णविभाजकतावच्छेदक-ब्राह्मणत्वादिव्याप्यवेदाध्ययन-व्याप्यसन्ध्योपासनादिसाधारणस्य वर्णविभाजकतावच्छेदकधर्मव्याप्यव्याप्यत्वस्य तत्समानाधिकरण-त्वस्य वा विशेषधर्मत्वात्मकत्वं भवद्व्यतिरिक्तो न कश्चित् प्रत्त्वेन । न द्वितीय इत्यादिकमप्यसङ्गतम् । भवदुक्त-द्वितीयपक्षस्याप्यन-ङ्गीकारात् । किं च विशेषधर्मत्वावच्छेदेन न मन्वाद्यनुक्तिं ब्रूमः, किन्तु केषाञ्चिद्विशेषधर्माणामेव, प्रायशो विशेषधर्माणामपि उद्देश्यविशेषापेक्षया सामान्यधर्मत्वसम्भवेन तदनुपपत्तेः । युष्म-त्प्रश्नस्योत्तरप्राशावप्यनिवर्त्यस्यापेक्षयैव निवृत्तिर्भाव्या । यदुक्त-मेवमेवेत्यात्यादिनारभ्येतदप्यसङ्गतं तत्र दूषणासङ्गतेः । मन्वनु-क्तस्य भस्मत्रिपुण्ड्ररुद्राक्षादिधारणस्यादिपदगृहीतब्रह्मोत्तरखण्ड-नारदपुराणसूतसंहितादिषु दर्शनवत् मन्वनुक्तस्योर्द्ध्वपुण्ड्रतुलसी-मालाधारणमुद्रव्यादेः पद्मपुराण-वराहपुराण-वसिष्ठादिस्मृतिषु दर्शनेन विशेषाभावात् । न चेत्यादिशङ्काद्वयं तत्समाधानद्वयं च ग्रन्थवाङ्क्ष्यमात्रप्रयोजनकमिति न तत्र किञ्चिद्वक्तव्यम् । यदपीत्यादि अपर्य्यनुयोज्योत्तरग्रस्तत्वादित्यन्तं ग्रन्थसङ्गतिपरि-पाट्यभिज्ञानाभावकृतं भारतेऽदर्शनं भवद्भिरूहितम्, तदानीं यदिहास्तीत्यादिवचनमवलम्ब्य तादृशशङ्काया उत्थानात् तत्स-माधानस्याप्यवश्यं वक्तव्यत्वात् । यत्तु भारतीयपाञ्चराचेत्या-दिकं वितण्डावादिचक्रपाणिवाक्यैकजीवात्युक्तं तदपि तादृश-

पाञ्चरात्रपुस्तकस्य भवद्भिरवश्यं दर्शनीयं तत् तदभावे तत्र शंखचक्राद्यङ्कनं नास्तीति भवद्भिः कथं ज्ञातम्? पाञ्चरात्र-सम्प्रदायविशेषस्योपरिचरानन्तरं नष्टत्वेऽपि सम्प्रदायविशेषस्या-द्यपर्य्यन्तमविच्छेदोऽस्तीति नारायणीयोपाख्यानादिवचनप्रमा-णोपपत्त्युपन्यासपुरःसरमभिधानादेव दूरतोऽपास्तम्। यत्तु यदपि किं चेत्यारभ्येत्यारभ्य तदप्यसङ्गतमित्युक्तम्, तदपि दुराग्रह-कृतपिष्टपेषणम्। वास्तवस्मृतिपुराणेषु वासिष्ठहारीतस्मृति-पद्मपुराण-वराहपुराणादिषु तत्र तत्रोक्तत्वाभिधानादेव निर-स्तम्। इत्यादिदार्ष्टान्तिकयोरपि भस्मत्रिपुण्ड्ररुद्राक्षादिधारण-स्योर्द्ध्वपुण्ड्रतुलसीमालादिधारणयोः क्वचित् प्रतिपादनाप्रति-पादनयोस्तुल्यत्वान्न वैषम्यमिति।

प्रश्न॰ अतएव तिलकावश्यकतायां च किं प्रमाणमिति।

दुर्ज॰ इति षष्ठं वाक्यं तत् षष्ठप्रधानप्रश्नवाक्योत्तरेणैव दत्तोत्तरमिति।

• टी॰ प्रश्नवाक्येऽतएवेति वाक्यालङ्कारे दत्तोत्तरमिति। तत्र,—

"सन्ध्याकाले जपे होमे स्वाध्याये पितृतर्पणे।
श्राद्धे दाने च यज्ञे च धारयेदूर्द्ध्वपुण्ड्रकम्॥
ऊर्द्ध्वपुण्ड्रं तु विप्राणां सन्ध्याऽनुष्ठानकर्मवत्।
श्राद्धकाले विशेषेण कर्ता भोक्ता च न त्यजेत्॥
सर्वैः श्वेतमृदा कार्य्यमूर्द्ध्वपुण्ड्रं यथाविधि।"

"हरेः पादाकृतिमात्मनो हिताय मध्ये छिद्रमूर्द्ध्वपुण्ड्रं यो

धारयति, स परस्य प्रियो भवति, स मुक्तिभाग्भवति” इत्यादि श्रुतिस्मृतिप्रमाणानां तिलकावश्यकतायामपन्यस्तत्वादिति भावः ।

सव्य० इति रामानुजीयाः, यत्त्वतएव तिलकावश्यकतायां च किं प्रमाणमित्यस्मत्प्रश्नेऽस्मद्भिरुक्तं तत् षष्ठप्रमाणप्रश्नोत्तरेणैव दत्तोत्तरमिति तदसङ्गतम् । तस्यादत्तोत्तरतायास्तत्रैवोक्तत्वात् विन्यासविशेषविशिष्टोर्द्ध्वपुण्ड्रधारणबोधकवाक्यानां भवादृशकल्पितत्वेनाप्रामाणिकत्वस्य प्रागेवोक्तत्वाच्च । अश्रौतमूर्द्ध्वपुण्ड्रमित्यादिपुराणेन तस्य शूद्रविषयकत्वस्यैव कल्पनीयत्वाच्चेत्यलम् इति तत्खण्डनम् ।

व्या० यत्त्वित्यादिना दत्तोत्तरमित्यन्तेन प्रश्नोत्तरे अनूद्य तदसङ्गतमिति प्रतिज्ञाय तस्येत्यादिना तदुपपादनं कृतम् तदसत् । भवतामदत्तोत्तरत्वव्यामोहस्य तत्रैव विद्रावितत्वात् विन्यासविशेषेत्यादि प्रागेवोक्तत्वाच्चेत्यन्तं च न सम्यक्, अश्रौतमूर्द्ध्वपुण्ड्रमित्यादिवचनस्यान्यार्थपरताया भस्मादौ भवदुक्तश्रुतिस्मृतिप्रमाणानां तुल्यन्यायेन कल्पितत्वसम्भवस्य तदप्रामाण्यस्योर्द्ध्वपुण्ड्रस्य ब्राह्मणावश्यकत्वस्य चोक्तत्वात् भस्मादिधारणप्रमाणस्य शूद्रविषयकत्वस्य वक्तव्यत्वाच्चेत्यलमिति ।

प्रश्न० विजातीय-तिलकनिन्दायां च किं प्रमाणम् ?

दुर्ज० इति सप्तमं वाक्यम्, तत्रोत्तरम् । चतुर्थप्रधानप्रश्नानुबन्धि-षष्ठवाक्योत्तरेणैव दत्तमेव । न हि सर्वेषामधिकारिणामकर्तव्यं विजातीयं तिलकमस्माभिरुच्यते, किन्त्वस्मत्सम्प्रदायिनामेवेत्युच्यते, तत्रापि इदं प्रमाणं भविष्यति । “अथ

यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् । ये तत्र ब्राह्मणाः सम्मर्शिनः युक्ता आयुक्ताः अलूक्षा धर्मकामाः स्युः । यथा ते तत्र वर्तेरन्, तथा तत्र वर्तेथाः” इति तैत्तिरीयोपनिषत्-श्रुतिवाक्यंजातम् । स्वस्य कर्मवृत्तसंशये स्वसम्प्रदायनिष्ठाभिज्ञजन-तन्निष्ठकर्तव्यतामभिदधदिति ।

टी० चतुर्थप्रधानप्रश्नानुबन्धीति तत्रापिपीलिकादृष्टणं निन्दाया भगवत्प्रसक्तिविरोधिततयाऽकर्तव्यत्वस्य सप्रमाणमुक्तत्वादिति भावः । ननु तन्निन्दाया अकरणे विजातीयं तिलकं न कर्तव्यमिति कथमुच्यते, इत्यत आह,—न हि सर्वेषामित्यादि । ननु युष्मत्सम्प्रदायिनां विजातीयतिलकाकर्तव्यत्वे किं प्रमाणमित्यत आह,—तत्रापीदमिति ।

सञ्ज० इति रामानुजीयाः, यत्तु विजातीयतिलकनिन्दायां च किं प्रमाणमित्यस्मत्प्रश्नोत्तरेऽद्भितैरुक्तं तत्रोत्तरम् । चतुर्थप्रधानप्रश्नानुबन्धि-षष्ठवाक्योत्तरेणैव दत्तमेवेत्यादि तच्चोच्यते, षष्ठवाक्योत्तरे नास्माभिः कस्यापि निन्दा क्रियते । यत्रापि वैष्णवशास्त्रे शिवशक्त्यादिमन्त्राणां निन्दा श्रूयते, सापि वैष्णवमन्त्राणां प्रशंसाबोधनार्था, वैष्णवानां शिवशक्त्यादिमन्त्रेभ्यो मनोव्यावृत्त्यर्था न हि निन्दान्यायेनेत्यादिकमुक्तम् । तैस्तत्र शिवशक्त्यादिमन्त्रनिन्दायां वैष्णवमन्त्रप्राशस्त्यबोधनकारणत्वमुत तत्पूर्वभावित्वमात्रं प्रतिज्ञातम् । नाद्यो यद्विशेषयोरिति न्यायेन निन्दामात्रस्य प्राशस्त्यबोधनमात्रकारणत्वेऽवश्यिते ‘तेजो वै घृतम्’ इति वाक्यबोधिताङ्गत्वनियामकघृतनिष्ठप्राशस्त्यस्याबोधि-

तत्त्वापत्त्या तेषां वापीत्यादिवाक्यानां सर्वथा वैयर्थ्यापत्तेः। नान्यः पूर्वभावित्वमात्रस्य नियतत्वे सम्प्रत्युक्तदोषापत्तेरनियतत्वेऽसम्प्रश्नस्य तादवस्थ्ये तत्कृदुत्तरस्याभासत्वापत्तेः। यच्चाप्युक्तमनोव्याहृत्यर्थमिति तदसङ्गतम्। श्रौतस्मार्तधर्मानभिज्ञत्रैवर्णिकजनप्रत्यवायकत्वेन भवादृशां प्रायश्चित्तसहस्रेणापि अनुद्धारापत्त्या नियतनरकभाक्त्वापत्तेः। यदुक्तं न हि निन्दान्यायेनेति तदप्यसङ्गतं व्याघातदोषग्रस्तत्वात् निन्दा क्रियते। न हि निन्दान्यायेति व्याघातस्य स्पष्टतरत्वात्। एवं च षष्ठवाक्यस्योत्तरत्वे एतस्यानुत्तरत्वं स्पष्टमेव, यदप्यत्र श्रुत्युपन्यसनं तदप्यस्माकमनुकूलम्। नाङ्कितानां तेषां सम्प्रदायस्य स्वल्पकालावधिप्रचलितत्वस्य पूर्वमसकृदावेदिततया श्रुत्या तद्बोधनीयत्वस्य बालैरपि सुज्ञेयत्वादित्यलमिति तत्खण्डनमिति।

व्या० यत्तु विजातीयेत्यारभ्य दत्तमेवेत्यादीत्यन्तेन प्रश्नस्योत्तरे अनूद्य असमञ्जसैर्दुर्वाक्यैकसारैस्तत्रोच्यते इत्यारभ्य तत्खण्डनमित्यन्तमुक्तं तदसङ्गतम्। तथा हि उदिताऽनुदितहोमनिन्दाश्रुतिवाक्यनिष्पन्नं न हि निन्दा निन्दितुं प्रवर्तते- ऽपि तु निन्दितादितरत्स्तोतुमिति मीमांसकन्यायमुपजीव्य शैववैष्णवधर्मकरणे वैष्णवशैवधर्मनिन्दा शैववैष्णवधर्मप्रशंसार्थेति तत्रास्माभिरुक्तं नास्माभिरित्यादिनाऽनूद्य तत्र शिवपञ्चाक्षरादिमन्त्र-निन्दायां वैष्णवमन्त्र-प्राशस्त्यबोधनकारणत्वमुत तत्पूर्वभावित्वमात्रमिति विकल्पशिरोदये दूषणमुक्तम्, तत्रेदं प्रष्टव्यम्। "वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोप-

धावति, स एवैनं भूतिं गमयति" इति अर्थवादवाक्यस्य "वायव्यं श्वेतमालभेत भूतिकामः" इति विहितयागप्राशस्त्यपरत्वं सर्वतान्त्रिकसिद्धम्। तत्र तादृशप्राशस्त्यबोधजनकत्वं कथमिति। यदि वाक्यलक्षणाङ्गीकर्तृ-तन्मते विशिष्टवाक्यस्य प्राशस्त्ये लक्षणा अन्यमतेऽपि चित्रगुरित्यादाविव कस्यचित् पदस्य तत्र लक्षणाऽन्येषां तात्पर्य्यग्राहकत्वमेवं च तादृशवाक्यबोधितप्राशस्त्यस्य कर्मण्यन्वय इति प्राशस्त्यविशिष्टकर्मबोध इत्युच्येत, तदोदितहोमादिनिन्दावाक्यस्याजचीरहोम-विधिशेषभूतस्य ग्राम्यान् पशून् हिनस्ति आरण्यान् पशून् हिनस्तीत्यादि जर्तिलयवागूहोमनिन्दावाक्यस्यापि अनुदितोदिताजचीरहोमवृत्तिप्राशस्त्ये लक्षणा तस्य तत्तत्कर्मण्यन्वय इत्यभिमतवाक्यार्थबोधसिद्धिरिति तुल्यम्। न चैवं "सोऽरोदीद्यदरोदीत्तद् रुद्रत्वं यो बर्हिषि ददाति, पुरास्य संवत्सरात्। गृहे रुदन्ति" इति निन्दावाक्येन कस्य प्रशंसा बोध्यते। यदि न कस्यापि तदा न हि निन्दान्याय एव भग्न इति वाच्यम्, "प्ररोचनया प्रवर्तते" द्वेषान्निवर्तते इति वाक्येन निन्दाया द्वेषद्वारा निवर्तकत्वं शबरस्वामिनोक्तम्। तथा च तादृशनिन्दावाक्यस्याप्राशस्त्यबोधद्वारा द्वेषमुत्पाद्य बर्हिषि रजतदानाद् व्यावृत्त्यर्थत्वात् कस्यापि प्राशस्त्यबोधकत्वाभावात् उदितानुदितहोमनिन्दायास्तु नैवं सम्भवति, उभयोरुदिते जुहोति अनुदिते जुहोति इति वाक्याभ्यां विहितयोर्निवृत्त्यसम्भवात्। अतो न निन्दामात्रस्य प्राशस्त्यबोधकारणत्वं कुत्रचित् निन्दायाः प्राशस्त्यबोधकारण-

त्वेऽपि न बर्हिर्ग्रंषयोरिति न्यायावतारः। असति बाधके इति तन्न्यायघटकत्वात्। अन्यथा कपालसंयोगरूपगुणविशेषस्य घट-रूपपृथिवीद्रव्यविशेषस्य च कार्य्यकारणभावस्य संप्रतिपन्नतया पृथिवीत्वेन द्रव्यत्वेन वा गुणत्वेन कार्य्यकारणभावसिद्ध्यापत्तेः। तथा प्रकृतेऽपि सोऽरोदीदित्यादिनिन्दाया बर्हिषि रजत-दाननिवर्त्तकत्वस्य द्वेषद्वारावश्यकतया बाधकसत्वात् न प्राशस्त्य-बोधकत्वं कुत्रचित् निन्दामात्रस्य प्राशस्त्यबोधकत्वे वा न भव-दुक्तवैयर्थ्यापत्तिः। अर्थवादस्यापि प्राशस्त्यबोधकत्वाङ्गीकार-मात्रेण यूपाञ्जनकरणघृतप्राशस्त्यबोधकस्य 'तेजो वै घृतम्' इति वाक्यस्य तद्बोधकत्वसम्भवात्। अत उक्तविकल्पीय-प्रथमपक्ष-दूषणं दूरापास्तम्। एवं द्वितीयपक्षदूषणमप्यकिञ्चित्करम्। तत्र प्रथमकल्पस्य नियतत्वे सति पूर्वभावित्वविषयकस्य दूषित-प्रथमपक्षे पर्य्यवसितस्य दूषितत्वेन तद्दूषणातिदेशासम्भवात्। तच्च द्वितीयपक्षदूषणमपि न सम्भवति, निन्दायाः प्राशस्त्य-बोधं प्रति अनियतपूर्वभावित्वस्यैवाङ्गीकारात्। तावता कुत्र-चित् निन्दायाः प्राशस्त्यबोधकत्वेऽपि भवत्प्रश्नस्य दूरगतत्वात्। तथापि तादवस्थ्याभिधानं शास्त्रीयमर्य्यादानुसारेणास्मदुक्तो-त्तरवाक्यार्थज्ञानाभावकृतम्। अतएव सदुत्तरस्यासदुत्तरत्वा-भिधानमपि यच्चाप्युक्तं मनोव्यावृत्त्यर्थमितीत्यादिना नरक-भाक्त्वापत्तेरित्यन्तेनासल्लक्षणैर्दुर्वाक्यैकसारैः तत्र भवतामय-मभिप्रायो यथाभ्युहितः। अस्माभिरसकृदुक्तिवितत्तिदुर्गावल-म्बने कृते कटूरटति, निकटवर्त्ती वाचाटो टिट्टिभो यत्र अप-

मरणमेव युक्तं मौनं वा राजहंसस्येति नीतिमवलम्ब्येते गच्छे-
युस्तदास्मद्ग्रन्थोऽखण्डितोऽवतिष्ठेदिति यद्यस्मान् प्रति दुरुक्ति-
रुच्येत तदा स न्यायोऽस्माभिरवलम्ब्येतापि निन्दासहनस्य
तुच्छनिन्दास्तुतिरिति शास्त्रेण सद्धर्मत्वप्रतिपादनात् सम्प्रदाय-
निन्दा तु न सहनार्हेति तत्र प्रतिवचनं देयमेवेति न भव-
दभिमतसिद्धिः । यद्वा

"सर्वभूतदयायुक्तं वैष्णवं द्वेष्टि यो नरः ।
स चण्डालो महापापी रौरवं नरकं व्रजेत् ॥"

इति रुद्रवाक्यं स्मृत्वा स्वस्मिन् महापातकित्वं विज्ञाय संला-
पादिस्वसम्पर्केणास्मास्वपि पातकित्वमनुसन्धायैतदभिधानयुक्त-
मिति भवतामभिप्रायः, तथापि न कश्चिद्दोषः । श्रीमन्नारा-
यणः खलु सर्वशक्तिरेतमपि निवारयेदेवेति यदप्युक्तमित्या-
दिना व्याघातस्य स्पष्टतरत्वादित्यन्तेन यदुक्तं तदप्यसत् । न
हि वयं निन्दां कुर्मः कस्यचिदपि तु शास्त्रीयनिन्दायाः
शास्त्रोक्तन्यायेनोपपत्तिं ब्रूम इति अस्माकं व्याघाताभावात् ।
एवं चेत्यादिकमपि तुच्छम् । षष्ठवाक्योत्तरस्योभयत्र सदु-
त्तरत्वात् श्रुत्युपन्यसनं सर्वेषां सम्प्रदायिनां तत्तत्सम्प्रदाया-
र्थानुष्ठानानुगुणमिति भवन्तः क्वचित्सम्प्रदाये तिष्ठन्ति चेत्
भवतामप्यनुकूलमेवमस्मत्सम्प्रदायस्य स्वल्पकालावधिप्रवर्तितत्वो-
क्तिरसकृन्निरस्तापि शवमुष्टिवत् तिष्ठति, चेत् तिष्ठतु श्रुत्या
तदबोधितत्वस्य बालैरेव सुज्ञेयत्वं न प्रामाणिकैरित्यलमवाच्य-
सम्भाषणेन ।

प्रश्न० तदनङ्गीकारे दोषस्य च किं प्रमाणम् ?

दुर्ज० इत्यष्टमं वाक्यम्, तत्रेदमुत्तरम्। अस्मत्सम्प्रदायिभिर्वर्णाश्रम-विहितसामान्यधर्मानुष्ठानकाले वैष्णवत्वोपयुक्तविशेषधर्मानुष्ठानकाले चोक्ततिलकमवश्यं कर्तव्यमित्यत्र प्रमाणप्रदर्शनेनोक्तमेवेति।

टी० अस्मत्सम्प्रदायिभिरित्यादिनित्यनैमित्तिकं काम्यं त्रिविधं श्रुतिचोदितम्,—

"ऊर्द्ध्वपुण्ड्रविहीनस्य सर्वं तन्निष्फलं भवेत्।"

इत्यादिकमभिप्रेत्य वर्णाश्रमविहितसामान्यधर्मेत्यादि।

"धृतोर्द्ध्वपुण्ड्रः कृतचक्रधारी
विष्णुं परं ध्यायति, यो महात्मा।
स्वरेण मन्त्रेण सदा हृदिस्थितं
परात्परं यन्महतो महान्तम्॥
धृतोर्द्ध्वपुण्ड्रः परमेशितारं
नारायणं साङ्ख्ययोगाधिगम्यम्।
स्मृत्वा विमुच्येत नरः समस्तैः
संसारपाशैरिह चैव विष्णुः।"

इत्यादिकमभिप्रेत्य वैष्णवत्वोपयुक्तेत्यादि। अत्रोपयुक्तत्वं च तत्सत्तानियामकत्वम्।

सज्ज० इति रामानुजीयाः, यत्तु विन्यासविशेषविशिष्टोर्द्ध्वपुण्ड्रानङ्गीकारे प्रत्यवाये किं प्रमाणमित्येतत्तात्पर्य्यक-तदनङ्गीकारे दोषे किं प्रमाणमित्यस्मत्प्रश्नेऽङ्कितैरुक्तं तत्रेदमुत्तर-

मित्यारभ्य प्रदर्शनेनोक्तमेवेत्यन्तकमस्मत्सम्प्रदायिनां तदनङ्गीकारे प्रत्यवायो भवत्येवेत्यभिप्रायकं तदसङ्गतम्। "अहरहः सन्ध्यामुपासीत" "नोपतिष्ठति यः पूर्वाम्" इत्यादिस्मृत्यनादरकर्त्तृषु भवादृशेषु श्रुतिस्मृत्येकगम्य-तद्विरुद्धाचरणजनित-प्रत्यवायस्यान्तरेण तदतिरिक्तप्रमाणं भवद्भिरवगन्तुमशक्यत्वात्। न च कस्याश्चित् श्रुतेः स्मृतेर्वाऽनादरे स्वादरणीय-स्मृत्यन्तरबोधिताचरणाङ्गीकरणप्रयुक्तप्रत्यवायोऽवगन्तुं शक्यत एवेति वाच्यम्, अन्तरेण दृढतरप्रमाणं श्रुतिस्मृत्यनादरे भवादृशां प्रत्यवायित्वस्य दुर्वारत्वादित्यलम् इति तत्खण्डनम् इति।

व्या० यत्तु सदमलक्षणैः शवमुष्टिभिर्यत्त्वित्यारभ्योक्तमेवेत्यन्तकमित्यन्तमस्मदुक्तानुवादपूर्वकं तदभिप्रायवर्णनपूर्वकं च तदसङ्गतमिति प्रतिज्ञाय तदुपपादकतयाऽहरहः सन्ध्यामित्यादिना किञ्चिदुक्तं तदसङ्गतम्। सन्ध्यावन्दनादिसकलनित्यनैमित्तिककर्माणि तत्तद्विहितकालेष्वनुतिष्ठत्सु नित्यनैमित्तिककर्मविधायकश्रुत्यनादरस्य वक्तुमशक्यत्वात्, श्रुतिस्मृत्येकगम्यतद्विरुद्धाचरणं च श्रुतिस्मृत्येकगम्य-वैष्णवासाधारणधर्माचरणशीलेषु तदाचरणाधिकारभूतसंस्कारविशेषवत्सु च न स्वप्नेऽपि दृश्यते। न हि मद्यपानादिकं न सुरां पिबेदित्यादिप्रमाणविरुद्धमनुतिष्ठामो वयम्। ननु मद्यपानागम्यागमनादीनां वैदिकप्रमाणविरुद्धत्वेऽपि शाक्तानां सद्धर्मत्वात् माहेश्वरो वै न स इत्यादिना मत्स्यो येन खादित इत्यादिप्रागुदाहृतप्रमाणश्लोकखण्डेन शाक्तानां माहेश्वरत्वाभावप्रयोजकव्यतिरेकप्रतियोगि-

त्वेनावगतत्वाच्च कथं तेषां शास्त्रविरुद्धत्वमिति चेत् तर्हि "पीत्वा-पीत्वा पुनः पीत्वा" इत्येवं पिबन्तु त्रिसन्ध्याकाले नास्माकं तत्सह-भोजनशय्यासनभाषणादिभ्यो यथा शक्तिदूरवर्तिनां काचिद्धानिः। तद्विरुद्धाचरणजनितप्रत्यवायस्यान्तरेण तदतिरिक्तप्रमाणं भव-द्भिरवगन्तुमशक्यत्वादिति यदुक्तं स्वाभिमतबोधविमुखेन वाक्येन तद्युक्तमेव। अन्तरेणेति शब्दस्य जलमन्तरेण पिपासाया न निवृत्तिरित्यादौ भेदवदर्थकत्वदर्शनेन श्रुतिस्मृत्यतिरिक्तभिन्न-श्रुतिस्मृतिस्थ ताभ्यां च न प्रत्यवायबोध इति बोधनात् भवद्भि-रिति तु श्रुतिस्मृतिप्रमाणाभ्युपगन्तृपरं चेत् समीचीनम्, श्रुतिस्मृतिप्रमाणबहिर्मुखैर्भवद्भिरेव तत्र प्रत्यवायस्यावगन्तव्य-त्वात्। न चेत्यादिकमपि मत्तोक्तोपर्युन्मत्ताशङ्का। अन्तरेणे-त्यादिप्रमत्तसमाधानम् अस्माभिः श्रुतिमात्रस्यादृतत्वात् अस्मा-दृशयदृच्छासम्भाषणेनापि भवादृशानां कतिपयप्रत्यवायनिवा-रणासम्भवाच्च। नन्वस्माभिर्दुरुक्तिमन्तराऽस्मदाश्रयप्रसादहेतु-र्नोपलक्षितोऽतस्तादृशदुरुक्तिविततिर्वितन्यते युष्माभिर्दुरुक्तिप्रा-याणि वाक्यानि किमित्युच्यत इति चेत् सत्यं, तथापि पिशाचाः पिशाचभाषयैव वक्तव्या इति निश्चित्यास्माभिस्तदभिधानं कृत-मिति जानन्तु भवन्तः।

प्रश्न० सकलशास्त्रसम्मतः शिवविष्णोरभेदो भवत्सम्मतो न वा?

दुर्ज० इति सप्तमः प्रधानप्रश्नः, तत्र सम्मत एवेत्युत्तरम्। स चाभेदः कीदृश इति विवेचनीयम्, किं स्वरूपाभेदो घटो घट इतिवत् विशिष्टाभेदो वा नीलो घट इतिवत्? नाद्यः सर्वैः

शास्त्रैरत्यन्तवैलक्षण्येन प्रतिपादितयोस्तयोः स्वरूपैक्यासम्भवात्। अपरः पक्षोऽवतिष्ठते, स च शरीरशरीरिभावेन स्यात्। अत-एवाथर्वशाखायामपि "अहमेव प्रथममासं वर्त्तामि भविष्यामि च" इत्यादिना सृष्टिकालात् पूर्ववृत्तित्वं प्रलयकालवृत्तित्वं सृष्टि-कालवृत्तित्वं सर्वकारणत्वपर्य्यवशायि-शास्त्रदृष्ट्या तूपदेशो वाम-देववदित्यवलम्ब्योक्तवति रुद्रे साक्षात्कारणत्वप्रतिपत्तिर्देवानां श्रोतृणां माभूदिति श्रुतिः सोऽन्तरादन्तरं प्राविशदित्यनेनेदं च सर्वकालवृत्तित्वाभिधानं रुद्रस्यान्तर्य्यामिबुद्ध्येत्याह सः रुद्रः अन्तरात् प्रकृत्यन्तर्वर्तमानाज्जीवात् अन्तरं ततः सूक्ष्मभूतं तस्याप्यन्तरात्मभूतं परमात्मानं प्राविशत मनसा विचारित-वानित्यर्थः। सर्वान्तर्य्यामिणः स्वान्तर्य्यामिणश्चैक्यात् स्वान्त-र्य्यामिदर्शने हि एवं बुद्धिर्भवति, तथैव हि शास्त्रदृष्ट्या तूप-देशो वामदेववदिति सूत्रविषयवाक्य "तद्वै तत्पश्यन् ऋषिर्वाम-देवः प्रतिपेदे अहं मनुरभवं सूर्य्यश्च" इत्यत्र ज्ञायते, तथापि स्मृतिरप्यमुमर्थं वदति,—

"सर्वगत्वादनन्तस्य स एवाहमवस्थितः।
मत्तः सर्वमहं सर्वं मयि सर्वं सनातने॥
अहं हरिः सर्वमिदं जनार्दनः"

इत्यादिका स चायमभेदोऽस्मत्सम्मतः शिष्येभ्यश्चोपदिश्यते एवं श्रीभाष्यश्रुतप्रकाशिकादिग्रन्थेषु बहुतरमुपपादनात्।

टी॰ अत्यन्तवैलक्षण्येनेति वैलक्षण्यशब्देन "नारायणाद्रुद्रो-जातः" इत्याद्युक्तोत्पाद्योत्पादकभावः,—

"अपहतपाप्मा दिव्यो देव एको नारायणः।

अनपहतपाप्माहमस्मि————————"

इत्यादिप्रमाणप्रतिपन्ने अपहतपाप्मत्वानपहतपाप्मत्वे नियन्तृनियामकभावः इत्यादिकं विवक्षितम्। स्वरूपैक्यासम्भवादिति स्वरूपैक्य उक्तवैलक्षण्यासम्भवादिति भावः। स चाभेदस्य चेत्र आत्मा जानातीत्यत्रेव शरीरशरीरिभावप्रयुक्तः स्यादिति भावः। अतएव शरीरशरीरिभावस्याभेदव्यवहारप्रयोजकत्वादेव सर्वकारणत्वपर्य्यवसायीति "सदेव सौम्येदमग्र आसीत्" "आत्मा वा इदमग्र आसीत्" "हिरण्यगर्भः समवर्त्तताग्रे" इत्यादिषु कारणस्य कार्य्यकालपूर्व्ववृत्तित्वस्य. कारणत्वापेक्षितस्य बोधनात् अक्षरं तमसि लीयते तमः परे देव एकीभवति, यत्प्रयन्त्यभिसंविशन्तीत्यादिनोपादानकारणे लयबोधकेन कारणत्वबोधनात् कार्य्यकालवृत्तित्वं चोपादानकारणस्यापेक्षितमिति तदभिधानमपि कारणत्वपर्य्यवसायीति भावः। शास्त्रदृष्ट्येत्यादि "इन्द्रस्यानपहतपाप्मनोऽधिकारिबोधयुक्तस्य भावनाविशेषवत उपास्यत्वासम्भवमाशङ्क्यान्तर्य्यामिबुध्या तदुपदेशमकरोत्" इति वदता शास्त्रदृष्ट्या तूपदेशो वामदेववदिति सूत्रेणोक्तं न्यायमवलम्ब्येत्यर्थः। सर्वान्तर्य्यामिण इत्यादि। एवं बुद्धिः वक्ष्यमाणसर्वतादात्म्यबुद्धिः भवतीति स्वान्तर्य्यामिणः सर्वान्तर्य्यामिणश्चैक्यज्ञानात् सर्वतादात्म्यबुद्धिव्यवहारयोर्ज्ञानिषु दर्शनात् तयोश्च स्वस्यान्तर्य्यामिणश्चाभेदबुद्धिमन्तराऽनुपपन्नतया तद्बुद्धिः कैमुत्यन्यायसिद्धेति भावः। तथा स्मृतिरपीति स्मृतिशब्देन

विष्णुपुराणं विवक्षितम्। अमुमर्थं शरीरशरीरिभावेनाभेदम्। सर्वगत्वादिति अनन्तस्य वस्तुपरिच्छेदशून्यस्य सर्वगत्वात्। “यः पृथिव्यां तिष्ठन् य आत्मनि तिष्ठन् एष आत्मान्तर्य्याम्यमृतः” इत्यादिकादेव माध्यन्दिनश्रुत्युक्तात् सर्वान्तर्य्यामित्वात् अहं स एव स चान्तर्य्यामी क इत्याह,—अहं हरिरिति। सर्वान्तर्भूतोऽहं हरिः अहमिव तच्छरीरभूतं सर्वं च चेतनाचेतनजातं स इति तदर्थः। उपदिश्यत एवेति कुत्रेत्याकाङ्क्षायामाह,—श्रीभाष्येत्यादि।

सञ्ज० इति रामानुजीयाः, यत्तु विष्णुशिवयोरभेदो भवत्सम्मतो न वेत्यस्मत्प्रश्नप्रधानप्रश्नेऽङ्कितैरुपक्रमोपसंहारबलेन ब्रह्मव्यतिरिक्ताखिल-मिथ्यात्वबोधनपूर्वक-विशुद्धतात्पर्य्यविषयकत्वं वेदान्तवाक्यानामज्ञात्वा स्वकल्पितार्थाभासक-शास्त्रप्रमाणोपन्यासेन स्वरूपाभेदनिरसनपूर्वकं विशिष्टाभेद उत्तरत्वेन प्रतिपादितस्तत्र सम्मत एवेत्यारभ्योपदिश्यत एवेत्यन्तकवाक्यप्रबन्धे सोऽसङ्गत एव विशिष्टस्य निर्वक्तुमशक्यतया विशिष्टाभेदस्य वक्तुमशक्यत्वात्। तथा हि किमिदं विशिष्टत्वं विशेषणेन संबद्धत्वमिति चेत् संबद्धत्वमित्यत्रापि सम्बन्धेन विशिष्टत्वोक्तावात्माश्रयता। न च विशेषणव्यावृत्तसम्बन्धाधारत्वं तदतो नात्माश्रयतेति वाच्यम्, व्यावृत्तशब्देन विशिष्टत्वोक्तावात्माश्रयतायास्तदवस्थत्वात्। न च विशेषणसम्बन्धाधारत्वं तदिति वाच्यम्, विशेषणविशेष्यसम्बन्धस्य द्विष्ठतया विशेषणस्यापि विशिष्टत्वापत्तेर्दुर्वारत्वात् समवायादिसम्बन्धस्य विशिष्टत्वाभावा-

पत्तेश्च तस्य सम्बन्धान्तराभावात् अनवस्थाभयात् विशेषणविशेष्य-सम्बन्धेभ्यो विशिष्टं भिन्नमभिन्नं वा ? नाद्यस्तद्व्यतिरिक्तत्वेन विशिष्टस्यानुपलम्भात्। दण्डिनमानयेत्युक्तेऽन्यस्यैवानयनप्रसङ्गाच्च। न द्वितीयो दण्डिनमानय दण्डमानयेति प्रतीत्योरवैलक्षण्यप्रसङ्गात् दण्डमात्रानयने दण्ड्यानीत इति व्यवहारप्रसङ्गाच्च। किं चेदं विशेषणं यद्विशेषितं तत्त्वान्तरं स्यात् व्यावर्तकमिति चेत् तत् किं व्यावृत्तेर्भेदस्य जनकमुत तत्प्रतीतेर्नाद्योऽसम्भवात्। न हि कुठारेण तरोरिव देवदत्तस्य कुण्डलादिना संपाद्यते द्वैधीभावो न द्वितीयोनयनादेरपि भेदप्रतीतिजनकस्य विशेषणत्वप्रसङ्गात्। न च विषयीक्रियमाणतया यद्व्यावृत्तिबुद्धिजनकम्, तद्विशेषणमिति वाच्यम्, विशेष्येऽतिप्रसङ्गात् तदन्यत्वे सतीति विशेषणान्न दोष इति चेन्नोपलक्षणेऽतिप्रसङ्गात्, न च नियमेन विषयीक्रियमाणतया तादृशबुद्धिजनकं विशेषणं न तथोपलक्षणमतो नोक्तदोष इति वाच्यम्, विशेष्यातिप्रसङ्गनिरासाय विशेषणसिद्ध्यधीनविशेष्यसिद्ध्यपेक्षकविशेष्यभिन्नत्वस्य विशेषणलक्षणकुक्षिप्रविष्टतया परस्पराश्रयताप्रसङ्गात्। एतेन "स्वबुद्ध्या रज्यते येन विशेष्यं तद्विशेषणम्" इति भट्टपादोक्तलक्षणमपि परास्तम्। परस्पराश्रयताया उक्तरीत्याऽत्रापि सत्त्वात्। न च सामानाधिकरण्येन प्रतीयमानं विशेषणमित्युदयनाचार्य्योक्तमेव विशेषणस्य लक्षणमिति वाच्यम्, सामानाधिकरण्यस्यार्थिकत्वेऽसम्भवात् दण्डदेवदत्तयोः श्वेतत्वघटयोश्च प्रतिनियताधिकरणकत्वेन समानाधिकरणत्वाभावात्।

न च दण्डित्वदेवदत्तयोरेकाधिकरण्यमस्ति दण्डिन एव देवदत्तत्वादिति वाच्यम्, तयोर्विशेषणविशेष्यभावसम्भवेऽपि दण्डदेवदत्तयोस्तदभावात् सामानाधिकरण्यस्य शाब्दत्वे तस्य चैकविभक्तिकानेकपदाभिधेयत्वरूपत्वेऽसम्भवो न हि विशेषणविशेष्यभावेन प्रसिद्धयोर्दण्डदेवदत्तयोर्दण्डदेवदत्त इत्येकविभक्तिकानेकपदाभिधेयत्वमस्ति भिन्नप्रवृत्तिनिमित्तशब्दानामेकार्थप्रतिपादकत्वरूपत्वे दण्डीदेवदत्त इत्यत्रैवादर्शनं दोषः। तथा हि यथा शुक्लः पट इति पदद्वयं शुक्लगुणं पटत्वं च निमित्तीकृत्य पटे प्रवृत्तं न तथा दण्डित्वं दण्डं निमित्तीकृत्य दण्डपदं देवदत्ते प्रवर्तत इति। तथा च कथं दण्डे विशेषणलक्षणसमन्वयो देवदत्तपदेन दण्डपदस्य निरुक्तसामानाधिकरण्याभावात् तस्माद्विष्णुशिवयोरभेदप्रतिपादकानां वाक्यानां स्वरूपाभेदतात्पर्यकत्वमेव प्रकल्पनीयम्। विष्णुशिवयोश्चैतन्यपदप्रतिपाद्यताया बहुशः शास्त्र उपलम्भेन चैतन्यस्य चैतन्येन स्वरूपतोऽभेदे बाधकाभावात्। न च शास्त्रे भेदेन विष्णुशिवयोः स्वरूपकथनासङ्गतिरिति वाच्यम्, मायावच्छिन्नेश्वरचैतन्यस्यैवोद्भूतसत्वगुणमायावच्छिन्नत्वोद्भूतरजोगुणमायावच्छिन्नत्वोद्भूततमोगुणमायावच्छिन्नत्वरूपैः ब्रह्मविष्णु-शिवादिपदप्रतिपाद्यतायाः "अथ यो ह खलु वा वास्य राजसोंऽशोऽसौ स योऽयं ब्रह्मा अथ यो ह खलु वा वास्य तामसोंऽशोऽसौ स योऽयं रुद्रोऽथ यो ह खलु वा वास्य सात्विकांशोऽसौ स योऽयं विष्णुः" इति मैत्रेयोपनिषद्वचसोऽवगततया भेदेन तद्रूपस्य तत्तत्पुराणेषूपलभ्यमान-

स्वोपाधिप्रयोज्यत्वनिश्चये उपाधेश्च ब्रह्मव्यतिरिक्तत्वेन मिथ्यात्वस्यैकमेवेत्यादिश्रुतितोऽवगमेऽकिञ्चित्करतया वस्तुतो भेदे मानाभावात् । अहमेवेत्यादिश्रुतिप्रामाण्येन रुद्रस्य सर्वान्तर्यामित्वमित्यत्वस्य वस्तुतोऽवगत्या सोऽन्तरादन्तरेत्यादिश्रुतेरौपाधिकभेदतात्पर्य्यविषयकत्वेनैव व्यवस्थोचिता शास्त्रदृष्ट्या तूपदेश इति सूत्रीयविषयवाक्यस्य वस्तुतोऽभेदतात्पर्य्यकत्वेनैव भगवता भाष्यकारेण वर्णनात् "ईश्वरः शर्व ईशानः" इति कोशप्रमाणेन शिवस्येश्वरपदवाच्यत्वावगत्येश्वरः सर्वभूतानामिति स्मृतिप्रमाणेन शिवस्यैव सर्वान्तर्य्यामित्वावगमे सर्वगत्वादनन्तस्येत्यादिस्मृतेरपि शिवविषयकत्वमेवोचितं वास्तवाभेदविषयकत्वमेव वा । अतएव "अहं हरिः सर्वमिदं जनार्दनः" इति स्मृतिरपि सङ्गच्छते । एवं रीत्या सर्वेषां वाक्यानामविरोधपूर्वकं समन्वये सम्भवति सति अयौक्तिकं विशिष्टाभेदं स्वीकुर्वाणा दग्धाङ्गाः श्रुतेरुपक्रमोपसंहारं वेदान्ततात्पर्य्यावगमकमनालोच्य विपरीतार्थकरणेन प्रत्यवायिनो विद्वद्भिरनादरणीया इत्यलमिति तत्खण्डनमिति ।

व्या० यत्त्वित्यादिना प्रतिपादितः, तत्रेत्यादिना च वाक्यप्रबन्धेनेत्यन्तेन किञ्चिदनूद्य सोऽसङ्गत एवेति प्रतिज्ञापूर्वकमसंबद्धपदवाक्य-तदर्थमसलज्जमभिरुक्तं तदसङ्गतम् । यदिति नपुंसकलिङ्गशब्दस्याभेदः प्रतिपादित इत्यत्रान्वयासम्भवः प्रतिपादित इत्यन्तरमिति शब्दाध्याहारे सोऽसङ्गत इत्यननुपपन्नम् । किं च वेदान्तवाक्यानामुपक्रमोपसंहारबलेन कुत्रचित् तात्पर्य्यं निर्णीयते,—

"उपक्रमोपसंहारावभ्यासो पूर्वताफलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्य्यनिर्णये ॥"

इत्यभियुक्तवचनेन तात्पर्य्याऽनुमापकत्वेनोपक्रमोपसंहारादीनामभिधानात् । न हि वेदान्तवाक्यतात्पर्य्यं वेदान्तवाक्येनैव बोध्यते अस्य वाक्यस्येदं तात्पर्य्यमिति । किं च यद्ययं प्रश्नो ब्रह्मव्यतिरिक्तकृत्स्नमिथ्यात्वं सर्ववेदान्तानां शुद्धे ब्रह्मणि तात्पर्य्यमिति वदतां मतमभिप्रेत्य कृतः तदा प्रश्न एव न सम्भवति, अभेदो हि भेदाभावः । नञुल्लेखिप्रतीत्या भावमनन्तर्भाव्यभावबोधासम्भवात् तादात्म्यमिति वक्तुमशक्यत्वात्, स च भेदः मिथ्याभूतो वा सत्यभूतः ? नाद्यः तयोरपि तन्मते व्यवहारिकस्य तस्याङ्गीकारात् भवतापि भेदेन तद्रूपस्य तत्तत्पुराणेषूपलभ्यमानस्येत्यग्रे वक्ष्यमाणत्वात् मिथ्याभूतभेदाभावस्य वास्तविकभेदाविरोधित्वाच्च । न द्वितीयः, प्रतियोग्यप्रसिद्धेः तन्मते वास्तविकभेदस्यैवानङ्गीकारात् । यत्तु विशिष्टस्य निर्वक्तुमशक्यतयेत्यादिना विशिष्टस्य विशेषणस्य च खण्डनं कृतं तत्तुच्छम् । न हि विशिष्टत्वं सर्वविशिष्टसाधारणः कश्चन केवलान्वयी धर्मः प्रमेयमितिवत् विशेषणानुल्लेखे व्यवहाराभावात्, किन्तु विशेषविशेष्यवैशिष्ट्यभेदेन भिन्नं तच्च तत्तद्विशेषणप्रतियोगिकसम्बन्धानुपयोगित्वम् । तच्च स्वरूपसम्बन्धविशेषः स चापृथक् सिद्धविशेषणानां सार्वकालिकः पृथक् सिद्धविशेषणानां विशेषणकालमात्रवृत्तिः सर्वत्र विशेषणकालमात्रवृत्तित्वमनुगतं नातो दण्डापगमेऽपि देवदत्तादौ विशिष्टव्यवहारः प्रामाणिकानाम् । ननु प्राचीनैर्विशेष्यत्वस्य सम्बन्धानु-

योगित्वरूपताया अङ्गीकारात् तदभेदप्रसङ्ग इति चेदस्तु को दोषः ? दण्डी देवदत्त इत्यादावेकज्ञानीयैकवृत्तिविषयतयोरेकत्वाङ्गीकर्तृमते दण्डत्वादिनिष्ठविशेषणता-निरूपकत्वं दण्डनिष्ठपुरुषप्रकारताया विशेष्यतात्वेनैव तथा विशिष्टताया अपि प्रकारता-संसर्गतानिरूपकत्वं विशेष्यतात्वेन न विशिष्टतात्वेन अतः स्वस्वरूपनिरूपककुक्षौ स्वाश्रयनिवेशः वस्तुतस्तन्निवेशेऽपि न कश्चिद्दोषः। ननु निरुक्तसम्बन्धानुयोगित्वं विशिष्टत्वमित्युक्तौ तादृशानुयोगित्वविशिष्टत्वस्यापि तद्रूपत्वेऽनवस्थेति चेन्न प्रामाणिकानवस्थायां सामग्र्यनवस्थावददोषत्वात् अन्यथा प्रमेयत्वे प्रमेयत्वाङ्गीकारे तत्रापि प्रमेयत्वमित्येवं रीत्याऽनवस्थायाः सर्वत्र प्रमेयत्वासिद्धिप्रसङ्गात्। यदि घटे रूपमित्यादौ समवायावच्छिन्नाधेयत्वात्मकसम्बन्धानुयोगित्वस्य रूपे सत्त्वेऽपि तत्र न घटविशिष्टताप्रतीतिरिति विभाव्यते, तदा सम्बन्धे वृत्तिनियामकत्वं निवेश्यम्। अतः किमिदं विशिष्टत्वमित्यादिकमनुचितमेव। किं च विशेषणसंबद्धत्वमित्यत्र सम्बन्धित्वमिति निर्वाच्यम्, तच्च विशेषणव्यावृत्तत्वसम्बन्धाधारत्वम्। विशेषणव्यावृत्तत्वं च विशेषणेऽवर्तमानत्वं सम्बन्धस्य द्विनिष्ठतया तद्विशेषणस्य सार्थकत्वात् नातो व्यावृत्तशब्देन विशिष्टत्वोक्तावित्यादिदूषणावकाशः न वा ? न चेत्यादिशङ्का तत्समाधानयोरवकाशः। समवायादिसम्बन्धस्याप्यनवस्थाभयेन स्वरूपसम्बन्धस्वीकारादेव समवायादिसम्बन्धस्येत्यादिदोषस्य नावकाशः। किं चेत्यादिकमपि न समीचीनम्, विशेषणविशेष्याभ्यां भेदस्य विशेष्याभेदस्य चा-

ङ्गीकारात्। अतः प्रथमपक्षोक्तदूषणस्य प्रथमस्य नावकाशः। किं च तेभ्यस्त्रिभ्यो भिन्नत्वाङ्गीकारेऽपि न दोषः। दण्डिन-मानयेत्यादौ दण्डो दण्डी वा केवल आनीयते किन्त्वन्य एवात-स्तत्प्रसङ्ग इत्यापत्त्या परिहरणीयः। अतएव द्वितीयपक्षोक्तदूषण-मपि न दण्डाभावकाले पुरुषस्य विशिष्टत्वानङ्गीकारादेव न तदा पुरुषमात्रानयनप्रसङ्गः दण्डस्य दण्डविशिष्टत्वाभावादेव दण्डिनमानय दण्डमानयेति प्रतीत्योर्नाविलक्षण्यप्रसङ्गः प्रसङ्गा-न्तरं वा। यत्तु किं चेदं विशेषणमित्यादिकमपि न समीचीनम्, यतो विशिष्टस्य पदार्थान्तरत्वं न सर्वसम्मतम्। किं च धर्मिणि व्यावृत्तिबुद्धिकाले वर्तमानं सत् तादृशबुद्धिजनकत्वं विशेषण-त्वमित्युक्तौ वक्ष्यमाणदोषानवकाशात्। न हि व्यावर्तकत्वं भेदजनकत्वमित्युच्यते, केनचित् तथोक्तावपि न हीत्यादि-दूषणस्य नावकाशः। न हि सर्वत्र भिनत्तिर्विदारणवाचकः "कुठारेण तरुर्भिन्नः" इत्यादौ तद्बोधेऽपि "शूद्राद् ब्राह्मणो-भिद्यते" इत्यादौ तद्बोधाभावात्। तत्र ह्यन्योन्याभाव एव बोध्यते। एवं च कुण्डलादिना देवदत्तो यज्ञदत्ताद्भिद्यत इ-त्यादौ ज्ञानज्ञाप्यत्वं तृतीयायाः प्रकृत्यादिभ्य उपसङ्ख्यानमि-त्यनुशासनशिष्टाया अर्थः प्रतियोगित्वं पञ्चम्यर्थः। तयोश्चा-न्योन्याभावे धात्वर्थेऽन्वयः। तथा च कुण्डलादिज्ञानज्ञाप्य-यज्ञदत्तप्रतियोगिकान्योन्याभाववान् देवदत्त इति शाब्दबोध इति न कश्चिद्दोषः। अतएव न द्वितीयपक्षोक्तदूषणस्याप्यव-काशः नयनादेर्धर्मिणि विद्यमानस्य व्यावृत्तिबुद्धिजनकत्वाभा-

वात् व्यावर्तकत्वं च भेदानुमापकत्वमेवेति वस्तुतो नयनादेस्तदा-पत्तिरेव नास्ति, नयनादीनां पुरुषे घटादिभेदानुमापकत्वे पुरुषविशेषणत्वमिष्टमेव। किं च विशेषणत्वस्योक्तरूपतया न चैत्यादिशङ्कायाश्च नावकाशः। किं च विषयीक्रियमाणतये-त्यत्र धर्मिविशेषणतया विषयीक्रियमाणतदेत्युक्तौ परामर्श-विशेष्ये पक्षे नातिप्रसङ्गः, तद्भिन्नत्वविशेषणेऽपि तादृशबुद्धिकाल धर्मिणि वर्तमानत्वविवक्षयैवोपलक्षणेऽतिप्रसङ्गो वारणीयः। किं च विशेष्येऽतिप्रसङ्गवारणायेत्यादिकमपि न सत्, विशेषण-विशेष्यसिद्ध्योर्विशेष्यविशेषणसिद्ध्यधीनत्वाभावात् दण्डदेवदत्तयोः सिद्ध्यभावेऽपि देवदत्तयोः सिद्धिसम्भवात् तत्तत्सिद्धेस्तत्तत्सा-मग्रीमात्राधीनत्वात् ज्ञानरूपसिद्धावपि न परस्परापेक्षा तत्त-ज्ज्ञानसामग्रीमात्राधीनत्वात् तस्याविशेषणत्वविशेष्यत्वपुरस्कारेण विशेषणविशेष्ययोर्ज्ञानस्य परस्परापेक्षत्वेऽपि प्रकृते नानुपपत्तिः विशेषणत्वस्य सर्वत्रानुगतस्यानङ्गीकारेण प्रतिव्यक्तिविश्रान्ततया देवदत्तविशेषणस्येदं लक्षणं, यद्देवदत्तभिन्नत्वे सति नियमेन प्रतीयमानतया देवदत्ते व्यावृत्तिबोधजनकत्वमित्युक्ते कथित-दोषाभावात् एतेनेत्यादिकमपि न सत्। भट्टपादाभिधाभि-प्रायाज्ञानात् रज्यते व्यावर्त्यते इति तदभिप्राया। अतएवोप-रञ्जकं विशेषणमिति न्यायविदः सामानाधिकरण्येन भासमानं विशेषणमित्युदयनाचार्योक्तमपि सम्यक्। न ह्यत्र वि-शेष्यसामानाधिकरण्यं विवक्षितमपि तु विशेष्यतावच्छेदकसामा-नाधिकरण्यमतो नार्थसामानाधिकरण्योक्तदोषावकाशः। एत-

दभिधानं च व्यावर्तकस्यैव विशेषणतया पर्वताधच्छेदकसामानाधिकरण्येन प्रतीयमानस्यैव व्यावर्तकत्वसम्भवादित्यभिप्रायेण न चेत्यादिकमपि प्रामादिकमिति ज्ञायते। दण्डित्वदेवदत्तयोर्देवदत्तपृथिव्यादिनिष्ठयोः सामानाधिकरण्याभावात् दण्डिन एवेत्युपपादनासङ्गतेश्च दण्डित्वदेवदत्तत्वयोरिति पाठकल्पनेनापि न निस्तारः। तयोर्विशेषणविशेष्यभावासम्भवात् धर्मिपारतन्त्र्येण विशेषणविशेष्यभावसम्भवो न प्रकृतोपयोगी शाब्दसामानाधिकरण्यपक्षस्तु नाभिमत इति तत्र कोलाहलो व्यर्थः। न हि एकविभक्तिकानेकपदाभिधेयत्वं सामानाधिकरण्यं शाब्दमिति घटः कुम्भ इत्यादौ तदतिप्रसङ्गं जानन् कश्चित् ब्रूयात्। किं च न तथा दण्डित्वं दण्डं निमित्तीकृत्य दण्डपदं देवदत्ते वर्तत इत्यप्यसत् भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमिति वदतां महाभाष्यकाराणां दण्डिपदस्य प्रवृत्तिनिमित्तत्वसम्भवाद्दण्डस्य तथा चेत्यादिकं न सत्, शब्दसामानाधिकरण्यस्य विशेषणशरीरेऽप्रवेशात् तस्मादित्यादिकमपि अप्रसिद्धेनाप्रसिद्धसाधनं विशिष्टविशेषणत्वयोः सुनिरूपणतया दुर्वचत्वाभावेन विशिष्टाभेदस्य वक्तुं शक्यत्वात्। अतो विष्णुशिवयोरुक्त एवाभेदः। किं च यदि विशिष्टत्वं दुर्वचनं तदा भवन्तो ब्राह्मणा न शूद्रा इति कथं वक्तव्यं ब्राह्मण्यवैशिष्ट्यस्य भवत्स्वभावात्। न हि स्वमतमपि किञ्चित्प्रतिपादयन्तो भवन्तः, केवलं महावैतण्डिकाः। सर्वपदार्थखण्डनं तेषामेव सङ्गच्छते। येषां किञ्चित् व्यवस्थापनीयं नास्ति। शास्त्रे विष्णु-

शिवयोर्भेदेन रूपकथनसङ्गत्यर्थं विष्णुशिवयोश्चैतन्यपदप्रतिपाद्यतायाः मायावच्छिन्नस्येश्वरचैतन्यस्योद्भूत-सत्वगुण-मायावच्छिन्नत्वादिविशेषणानामथ यो ह खलु वा वास्येत्यादिश्रुतिप्रतिपन्नानां तत्प्रयुक्तविष्ण्वादिशब्दवाच्यतायाश्च स्वीकरणीयतया भवतां तत्खण्डनकोलाहलासम्भवात् । किं च स्वरूपाभेदस्य पारमार्थिकत्वमङ्गीकृत्य वेदोपबृंहणपुराणादिषु तयोर्वैलक्षण्यप्रतिपत्तेस्तत्प्रयुक्त-भेदोपलम्भस्यापारमार्थिकार्थविषयकत्वेनाप्रामाण्यं तदुपबृंह्यश्रुतिवाक्यानामपि तथैवाप्रामाण्यं वक्तुमनुचितम् । अस्मदुक्तरीत्याभेदप्रतिपादकानामभेदप्रतिपादकानां च वाक्यानां प्रामाण्यव्यवस्थापनमेवोचितं घटश्रुतिवाक्यैरेव तादृशवाक्यद्वयार्थविरोधस्य परिहृतत्वादित्यन्यत्र विस्तरः । अथ यो यो ह खल्वित्यादिश्रुतिरपि नास्मदननुगुणा प्रकृतिशब्दवाच्यस्य यो राजसोंऽशो राजसगुणस्तद्वान् तत्प्रधानो ब्रह्मेत्याद्यर्थस्यास्मदनुकूलत्वात् शुद्धसत्वस्य सत्वत्वसामान्येनास्य सात्त्विकोंऽश इत्यभिधानमिति न तदपि विरुद्धमस्माकम् । यत्तु अहमेवेत्यारभ्योक्तं तदपि स्वोक्तिविरुद्धम् । पूर्वमद्वैतिमतमाश्रित्य सर्वोऽपि प्रपञ्चः कृतः । इदानीमन्तर्य्यामित्वं शिवस्येत्युच्यते, शिवस्यान्तर्य्यामित्वं नीलकण्ठभाषितशैवमते तच्च न ब्रह्माव्यतिरिक्तस्य मिथ्यात्वं प्रत्युत विशिष्टाभेद एव प्रतिपाद्यः । किं चाहमेवेत्यादिना वक्तुः सृष्टिपूर्वकालवृत्तित्वादिकमेव प्रतिपाद्यते तेन नित्यत्वमपि न ह्यन्तर्य्यामित्वमेतद्वाक्यप्रतिपाद्यम् । शिवस्यान्तर्य्यामित्वं वदद्भिश्च न भेदस्यौपाधिकत्वं स्वीकर्त्तमिति तादृशश्रुतेरौपाधिकभेदतात्पर्य्येण

व्यवस्था न सम्भवति, तात्पर्य्यविषयकत्वेनेति ग्रामादिकमिति प्रागावेदितम्। शास्त्रदृष्ट्या तूपदेश इत्यादिसूत्रविषयवाक्यस्य वस्तुतो भेदतात्पर्य्यकत्वं शङ्कराचार्य्योक्तमपि प्राणस्तथानुगमादित्यधिकरणासङ्गतमिति नास्माकं तत्रादरः “ईश्वरः शर्व ईशानः” इत्यादिकमपि भ्रान्तिजल्पनम्। शिवशब्दपर्य्यायपठितस्येश्वरशब्दस्य सर्वत्र शिवपरत्वे ईश्वरोऽहमहं भोगीत्यादावपि शिवस्यैवाभिधानेऽज्ञानादीनामपि तस्य प्रसङ्गात्। अतो योगरूढ्या तस्य शिवपर्य्यायत्वेऽपि योगेन नारायणवाचकत्वस्यैव तस्य तत्र वक्तव्यत्वात्। अतएव ”भूतानामीश्वरोऽपि सन्” इत्यादिकमप्युपपद्यते। किं चान्तर्य्यामिब्राह्मणे “यः पृथिव्यां तिष्ठन् य आत्मनि तिष्ठन्” इत्यादौ प्रतिपर्य्यायम् “एष त आत्मान्तर्य्याम्यमृतः” इति बृहदारण्यकस्थम् एव “सर्वभूतान्तरात्मा” इति सुबालोपनिषद्गतम् इति कस्यचिदन्तर्य्यामित्वमुक्त्वा चरमपर्य्याये “एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः।” इति सर्वकारणवाक्यश्रुतसद्ब्रह्मात्मादिसामान्यशब्दपर्य्यवसानभूमौ सर्वविशेषभूतस्यासम्भवदन्यसम्भावनस्य नारायणपदस्यार्थेऽन्तर्य्यामित्वं स्पष्टमभिहितम्। तथा सुबालोपनिषदि प्रतिपर्य्यायं चैष सर्वभूतान्तरात्मेत्युक्तमिति न शिवस्यान्तर्य्यामित्वसम्भवः। किं चैकमेवेत्यादिश्रुतिरपि ब्रह्मव्यतिरिक्तस्य मिथ्यात्वं नाभिदधाति, किन्तु “स्तब्धो ऽस्युत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतम्” इत्यादिनार्थात् प्रतिज्ञातं जगदुपादानत्वं प्रतिपादयितुं यथा सौम्यैकेनेत्यादिना दृष्टान्तमुक्त्वा

स देवेत्यादिनोपादानत्वं कण्ठत उक्तम्। यथापूर्वं कटककुण्डलादिकं सर्वं स्वर्णपिण्डमेकमेवेत्युक्तौ स्वर्णपिण्डस्य कटकाद्युपादानत्वं स्पष्टं प्रतिपद्यते। तथेदं सर्वं सृष्टेः प्राक्काले सदेकमेवेत्यभिहिते भाव्यवस्थाविशेषवतः प्रागवस्थाविशेषसम्बन्धरूपमुपादानत्वमभिहितं भवति, तस्मान्न कस्यचिन्मिथ्यात्वं तत्रोक्तमिति। एवं नारायणस्यैव सर्वान्तर्य्यामित्वस्य प्रमाणप्रतिपन्नत्वात् "सर्वगत्वादनन्तस्य" इत्यादिस्मृतेरपि शिवविषयकत्वमेवोचितमित्यनुचितम्। परन्तु सर्वशब्दान्तर्गतत्वेन तस्य तद्विषयकत्वमुचितमिति तु सम्यगुचितमेव। किं च शिवस्यान्तर्य्यामित्वे "अहं हरिः सर्वमिदं जनार्दनः" इति वाक्यमपि न सङ्गच्छते। योगरूढ्या नारायणप्रतिपादकयोर्हरिजनार्दनशब्दयोः शिवपरत्वासम्भवात् योगेन तदभिधानमपि तदेव वक्तव्यं यदि नारायणपदस्य कथञ्चित् शिवपरत्वमुपपद्येत तदुपपादनार्थं दिवारात्रमजस्रं चिन्तां कुर्वाणा अपि श्रीकण्ठविद्यागुरवो दीक्षिता न तत्त्वबाधया विमुक्ताः वास्तवाभेदविषयकत्वं न सम्भवतीति श्रीभाष्यादिषु स्पष्टम्। अतोऽस्मदीयोक्तिप्रकारेणार्थवर्णन एव सर्वश्रुतीनामविरोधेनान्वयसम्भव इति अयौक्तिकमित्यादिदुर्वचनशीलैरीर्ष्याद्वेषदग्धसर्वकरणैर्यदुक्तं तदतीव तुच्छम् इति कृतं विस्तरेण।

प्रश्न० तत्राभेदः सम्मतश्चेत् तदुपदेशः कुतो न क्रियते। प्रत्युत शिवपूजादेः प्रतिषेधः क्रियते।

दुर्ज० इत्येतत्प्रश्नावलम्बिस्वष्टसु वाक्येषु प्रथमं वाक्यं तत्रेऽ-

णरम्। उक्तोऽभेद उपदिश्यत एव शिवपूजादेः प्रतिषेधः क्रियत एव।

"येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्॥"

इति भगवतैव देवतान्तरपूजानादेरविधिपूर्वकत्वाऽभिधानात् "प्रतिबुद्धा न सेवन्ते यस्मात्परिमितं फलम्" इति वचनेन "सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभाक्" इत्युक्तप्रतिबुद्ध-शब्दाभिधेयमुमुक्षुभिरल्पफलप्रदानात् देवतान्तराणामसेव्यत्वा-भिधानाच्च रुद्रस्य मोक्षप्रदत्वासम्भवः। भारतखिलहरिवंशीय-घण्टाकर्णवृत्तान्ते सुस्पष्ट इत्यस्मदनुयायिनामनन्यदेवताकार-भङ्गभीतानां युक्त एव शिवपूजादित्याग इति।

टी॰ उक्तोऽभेद इति शरीरशरीरिभावकृतोऽभेद इत्यर्थः। शिवपूजादिप्रतिषेधानुकूलं प्रमाणमाह,—येऽप्यन्येत्यादिना। अविधिपूर्वकत्वाभिधानादिति न ह्यविधिपूर्वकमित्युक्तमनुष्ठेय-मिति भावः। अथ रुद्रादीनां कण्ठतोऽनुपास्यत्वं सोपपत्तिकं प्रतिपादयद्वचनमाह,—प्रतिबुद्धा इति ब्रह्माणं शितिकण्ठं चे-त्यादिपूर्वार्धम्। प्रतिबुद्धा मुमुक्षवः यस्मात् देवतान्तरात्। ननु प्रतिबुद्धशब्दो मुमुक्षुपर इति कथमवगम्यते मोक्षप्रदस्य शिवस्य कथं परिमितफलप्रदत्वमित्याकाङ्क्षायामाह,—सर्वे च्यवनधर्माण इत्यादि। सर्वे आर्त्तादयः च्यवनधर्माणः स्वस्व-रूपानुरूपान्मोक्षफलाच्युता इत्यर्थः। प्रतिबुद्धः ज्ञानी त्वा-त्मैव मे मतम् प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम

प्रिय इत्यादिभिः प्रतिपादितं तु शब्दार्थवैलक्षण्येन समच-रित्यर्थः ।

सच्च० इति रामानुजीयाः, यत्तु तत्त्वाभेदः सम्मतश्चेत् तदुपदेशः कुतो न क्रियते, प्रत्युत शिवपूजादेः प्रतिषेधः क्रियते इत्याकारकास्मत्प्रश्नोत्तरे तत्रोत्तरमित्यारभ्य युक्त एव शिवपूजादित्याग इत्यन्तकवाक्यप्रबन्धे विशिष्टाऽभेदाङ्गीकार-पूर्वकशिवपूजादेः प्रतिषेधः । येऽप्यन्यदेवतेत्यादिगीतावाक्य-प्रमाणेन प्रत्युत शिवादिपूजनस्याकर्तव्यत्वं शिवस्य परमपुरुषा-र्थाप्रदातृत्वं चोक्तमङ्कितैस्तदसङ्गतम् । तथा हि विशिष्टाभेदस्तु पूर्वप्रश्ने वेदान्तवाक्यानामुपक्रमोपसंहारबलेनेश्वरपदप्रतिपाद्य-योश्चैतन्यरूपत्वेन विष्णुशिवयोर्लीलार्थं मायिकधृतविग्रहयो-रपि वस्तुतः स्वरूपतोऽभिन्नयोः स्वरूपाभेदतात्पर्य्यकत्वेनोपपत्त्या-ऽयौक्तिकत्वेन खण्डित एव । यदपि येऽप्यन्यदेवतेत्यादिप्रमाणेन शिवपूजनस्य सावधारणतया प्रतिषेधकथनं तदप्यसङ्गतम् ।

"अन्यान् देवान् परित्यज्य कर्मणा मनसा गिरा ।
शिवं साम्बं च सगणं भज भावसमन्वितम् ॥"

इति वायवीय-संहितावचनप्रमाणेन,—

"शैवाः सौराश्च गणेशा वैष्णवाः शक्तिपूजकाः ।
मामेव प्राप्नुवन्तीह वर्षाम्बु सागरं यथा ॥"

इति वचनप्रमाणेन येऽप्यन्यदेवतेति स्मृतिघटकीभूतान्यपदेन पञ्चदेवतातिरिक्तदेवताग्रहणस्योचितत्वात् । यद्वा,—

"ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।

लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥"

इति भगवद्वचनप्रमाणेनेश्वरतुष्ट्यतिरिक्तफलोद्देश्यकत्वस्यैवाविधिपूर्वकत्वादीश्वरतुष्ट्यतिरिक्तफलफलकान्यदेवताकर्मक-यजनस्यैवाविधिपूर्वकत्वनिश्चयाच्च सामान्यतो देवतान्तरयजनस्याविधिपूर्वकत्वस्य वक्तुमशक्यत्वाच्च ।

"विहाय साम्बमीशानं भजन्ते देवतान्तरम् ।
ते महाघोरसंसारे पतन्ति परिमोहिता ॥"

इति पाराशरवचनात् शिवमपूजयतोऽधःपातदर्शनाच्च । यदप्युक्तं घण्टाकर्णवृत्तान्तेन भारतादिषु वर्णितेन रुद्रस्य मोक्षप्रदत्वासम्भव इति तदप्यसङ्गतम् । वासुदेवोऽर्जुनं प्रति,—

"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥
तमेव शरणं गच्छ सर्वभावेन भारत ।
तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥"

इत्यादिना ईश्वरवाच्यस्य शिवस्यैव प्रसादान्निरतिशयानन्दावाप्त्यात्मकमोक्षस्य प्रतिपादनेन निरुक्तवृत्तान्तस्य वास्तवविष्णुशिवभेदवादिभवादृशजन्मजन्मान्तरसम्पादितपापपुञ्जकलुषितान्तःकरणविष्णुविदूषकपाशुपताहङ्कृतिनिवृत्तितात्पर्य्यकत्वेनैव सङ्गिर्वर्णनीयत्वात् । अतएव नैयायिकाः स्वाभिमतं परमात्मानं भवशिवस्थाण्वीश्वरादिशब्दैर्व्यवहरन्तः परमेश्वरस्यैव परभावं स्वाभिमतं प्रकटयामासुः प्रकटयन्ति चातएव भरतमुनिमतानुसारिणः,—

"कल्पान्तरे कदाचित्तु दग्ध्वा लोकान् महेश्वरः ।
मनसैवासृजद् विष्णुं ब्रह्माणं च निजेच्छया ॥"

इति व्यवहरन्तः सङ्कृता भवन्ति । अतएव नारदपञ्चरात्रे ब्रह्मनारदसंवादे नारदेन ब्रह्माणं प्रति,—

"ब्रह्मन् ! केन प्रकारेण सर्वपापक्षयो भवेत् ।
धर्मार्थकाममोक्षादि प्राप्यन्ते सर्वसिद्धयः ॥
भुक्त्वा भोगान् स विपुलान् प्राप्नोति परमं पदम् ।
सुरासुरनरव्यालमुनीनामपि दुर्लभम् ॥
तद् ब्रूहि सकलं तात ! नातः परमहं वृणे ।
अनन्तज्ञानपाथोधे स्वयं भो ! भोगमोक्षदम् ॥"

इति पृष्टेन ब्रह्मणा,—

"शृणु तत्र प्रवक्ष्यामि गुह्याद् गुह्यतरं महत् ।
न कस्यापि मया ख्यातं भवभूरिभयावहम् ॥
परात्परतरं पुत्र नारायणपरायणाः ।
आप्नुवन्ति परं स्थानं यत्रानन्तसुखं महत् ॥
जपयज्ञतपोहोमव्रताध्ययनसंयुताः ।
दयादानदमस्नानशौचाचारसमन्विताः ॥
अपि तत्र न यास्यन्ति ये सदा शिवनिन्दकाः ।
अन्धं तमः प्रपद्यन्ते ये वै शङ्करनिन्दकाः ॥
तस्मादेकान्तचित्तेन समाराधय शङ्करम् ।
अम्बिकापतिमीशानं खण्डचन्द्रावतंसकम् ॥
त्रिनेत्रं शूलपाणिं च भुक्तिमुक्तिप्रदं शिवम् ।"

इत्युक्तमपि सङ्गच्छते। तस्माद्दासवश्रुतिस्मृतीतिहासपुराणैः शिवविष्णुयोस्तत्तदाकारविशिष्टविग्रहस्यौपाधिकत्वस्य निश्चयेन चैतन्यरूपयोस्तयोः स्वरूपतोऽभेद एव वेदान्तवाक्यपर्य्यवसानं विशिष्टाभेदस्त्वयौगिकत्वाद्धेय एवेत्यलमिति मिश्रपरामर्श इति तत्खण्डनम्।

व्या० यत्तु तत्राभेदः इत्यारभ्याङ्कितैरित्यन्तमसम्बद्धमिदुर्वाक्यैकपरपराजयसाधनैः प्रश्नोत्तरे अनूद्य तदसङ्गतमिति प्रतिज्ञाय तथा हीत्यादिना तदुपपादकमिव किञ्चिदुक्तम्, तत्तुच्छमामूलाग्रम्। तथा हि विशिष्टाभेदं व्यवस्थापयद्भिर्विशिष्टत्वविशेषणत्वोपपादनेनानेकश्रुतिस्मृतिविरोधेनात्यन्तवैलक्षण्येन प्रतिपन्नयोर्विष्णुशिवयोः स्वरूपाभेदासम्भवोपपादनेन स्वरूपाभेदतात्पर्य्यनिराकरणेन च विशिष्टाभेदो व्यवस्थापित एवेति यौक्तिकं भवदीयं खण्डनं नास्त्येव। यदि चुरादिना खण्डनं कृतं तन्न वयं विद्मः कथं तत्खण्डनममूर्तस्य तादृशभेदस्य कृतमिति। यदि विष्णुशिवयोश्चैतन्यरूपत्वेनाभेदो भवत्सम्मतस्तदा नास्माकं तत्र विप्रतिपत्तिः घटपटयोः स्वरूपतोऽत्यन्तभिन्नयोरपि पृथिवीत्वेनाभेदाङ्गीकारे तस्य विशेषणापर्य्यवसायितया दोषाभावात् "इच्छागृहीताभिमतोरुदेहः संसाधिताशेषजगद्धितोऽसौ" इत्यादिना "सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः॥" इत्यादिश्रुतिभिरपहतपाप्मत्वेनाभिहितस्य लीलार्थं मायिकधृतविग्रहत्वं सम्भवति, मायिकत्वं चेच्छाप्रयुक्तत्वमेव मायावयुनं ज्ञानमिति वेदनिघण्टुना मायाशब्दस्य ज्ञान-

वाचकत्वावगमात् इच्छायाः ज्ञानस्वरूपत्वाङ्गीकाराच्च। शिव-स्यानपहतपाप्माहमस्मीति स्वनामकरणार्थं ब्रह्माणं प्रेरयतः कथं नारायणतुल्यशरीरत्वम्। यत्तु यदपीत्यादिना तदप्ययु-क्तमित्यन्तेन प्रतिज्ञाय तदुपपादनं कृतं तदपि तुच्छम्। अन्यान् देवानित्यादिवायवीयसंहितावचनस्य शैवाधिकारिविष-यकत्वेन शैवाः सौरा इति वचनस्य च पञ्चदेवतापूजकस्मार्ता-धिकारिप्रोत्साहकत्वेन च विरोधाभावेन "येऽप्यन्यदेवताभक्ताः" इति वचनघटकान्यदेवतापदस्य तेऽपि मामेवेति वाक्यशेषान्त-गतश्रीकृष्णव्यतिरिक्तदेवतामात्रतात्पर्य्यकस्य पञ्चदेवताऽतिरिक्त-देवतापरत्वकल्पनासम्भवात्।

"यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्॥
स तया श्रद्धया युक्तस्तस्याराधनमीहते।
लभते च ततः कामान् मयैव विहितान् हितान्॥
अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्।
देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि॥"

इत्यादिभिर्विष्णुव्यतिरिक्तदेवपूजकस्याल्पमेधस्त्वान्तवत्फलत्वयो-रविशेषेण प्रतिपादनेन येऽप्यन्यदेवतेत्यादिवचनगतान्यदेवता-पदस्य भवदुक्तार्थपरत्वसम्भावनाया अपि दूरापास्तत्वात्। यद्वे-त्यादिकमपि अत्यन्तासमीचीनम्, "ब्रह्मण्याधाय कर्माणि" इति वचनेन हि फलसङ्गकर्तृत्वत्यागपूर्वकमनुष्ठितस्य कर्मणोऽ-खिलप्राप्तिविरोधिपापनिवर्तकत्वमुच्यते, न त्वीश्वरतुष्टिः फल-

मिति। अविधिपूर्वकत्वं च देवतास्वरूपमज्ञात्वाऽनुष्ठीयमानस्यैवेति युक्तम्। "यस्योतर्थ्या देवतायस्तावमन्वायत्ता तां चेदविद्वान्" इत्यादिश्रुत्या तदवगमात् अन्यथा स्वर्गादिफलार्थमनुष्ठीयमानानामपि कर्मणान्तत्वापत्तेः। एवम् आर्त्ताधिकार्य्यादिभिरनुष्ठीयमानस्य चतुर्विधा भजन्ते मामित्याद्युक्तस्य भजमानस्यापि तत्त्वापत्तेः। मन्मते तु नायं दोषः देवतास्वरूपज्ञानपूर्वकमेतदनुष्ठानात्। एवमन्तर्य्यामिपर्य्यन्तपूजनबुध्याऽनुष्ठीयमानस्य देवतान्तरोद्देश्यकर्मणो नाविधिपूर्वकत्वमिति ज्ञायते। "स आत्मा अङ्गान्यन्या देवताः" इति श्रुतेः। न हि पादसंवाहनाद्युपचारः केवलशरीरस्य किन्तु तदात्मन एव। अतः सामान्यतोऽन्तर्य्यामिबुद्धिमन्तरा केवलदेवतान्तराराधनबुध्या क्रियमाणस्याविधिपूर्वकत्वं युक्तमेव। विहाय साम्बमित्यादि वचनमपि शिवस्य परबुध्या शिवमुपासीनस्य मध्ये शिवे श्रद्धानिवृत्त्या शिवमपूजयतोऽधःपाताभिधायकं तादृशशिवपूजाफलानवाप्त्याधःपतनस्यावश्यकत्वात्। यदप्यत्रोक्तं घटाकर्णवृत्तान्तेनेत्यादिकं तदपि न सत्। "ईश्वरः सर्वभूतानाम्" इति हीश्वरस्य सर्वभूतान्तर्य्यामित्वमभिदधाति। तथान्तर्य्यामित्वं शिवस्य न सम्भवतीति प्रागावेदितमनेकप्रमाणोपपत्तिभिः। 'तमेव शरणं गच्छेत्' इति वचनमपि "मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते।" इति वचनैकार्थ्यं श्रीकृष्णस्यैवान्तर्य्यामित्वं वदति,—

विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति।
पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम्॥

नारायणपरं ब्रह्मतत्त्वं नारायणः परः।
नारायणपरो ज्योतिरात्मा नारायणः परः॥
यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः॥
अनन्तमव्ययं कविं समुद्रेऽन्तं विश्वशम्भुवम्।"

इत्यादिश्रुत्या पुरुषशब्दनिर्दिष्टस्य नारायणस्यैवान्तर्यामित्वावगमात् तस्यैवान्तर्यामिणः पुरुषशब्दाभिधेयस्य "महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तकः" इति सत्त्वाभिवृद्धिद्वारा मोक्षोपायत्वसम्भवान्मोक्षार्थप्रसादवान् नारायण एव भवितुमर्हतीति। इदमपि अन्तर्यामिबोधकेश्वरशब्दार्थस्य नारायणत्वमवगमयतीत्यतो न शिवस्य मोक्षप्रदत्वमनेन वचनजातेन प्रतीयतेऽतो निरुक्तघण्टाकर्णवृत्तान्तो वास्तवार्थपर एवेति न भवदुक्तरीत्याऽन्यथासिद्धिसम्भावनार्हः। अतएवेत्यादिकमपि न सत्। यो यो ग्रन्थकर्ता यां यां देवतां स्वेष्टदेवतात्वेनोपास्ते स तु ग्रन्थादावनन्यत्र वा तामेव नमस्करोति। अतएव केचिन्नैयायिका विष्णुनमस्कारमपि ग्रन्थादौ चक्रुः "कल्पान्तरे कदाचित्तु" इति श्लोकोऽपि न शिवस्य जगत्कारणत्वादिबोधकः "तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम्" इति श्रुतिवाक्यस्य-नारायणपरमहेश्वरशब्दसमानार्थकत्वात्, तत्रापि परमेश्वरशब्दो नारायणस्यैव वाचक इत्यवश्यमभ्युपगन्तव्यम्। महेश्वरशब्दनिर्दिष्टस्य स कारणं करणाधिपाधिप इत्यनेन कारणत्वाभिधानात्,—

"नारायणपरं ब्रह्म आत्मा नारायणः परः
नारायणपरोज्योतिः"

इत्यादिना कारणवाक्येषु कारणवस्तुपरतयावगतानां ब्रह्मात्मज्योतिरादिशब्दानां नारायणशब्देन सामानाधिकरण्येन तत्रैव पर्य्यवसानदर्शनात् नारायणशब्दापेक्षया विशेषशब्दाभावेन तस्य व्यक्त्यन्तरे पर्य्यवसानाभावाच्च नारायणस्यैव कारणत्वोक्तेः। विष्णुमसृजदित्यपि तदैव सङ्गच्छते विष्णोर्नारायणावतारतया विष्णुशरीरस्य तदिच्छाकृतत्वे विरोधाभावात्। सृष्टिः शरीरसम्बन्धसम्पादनमेव तोयेन जीवान् व्यससर्ज भूम्यामिति श्रुतौ तथावगमात् तोयशब्दस्य पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीत्यत्र श्रुतापूशब्द इव भूतमात्रपरः। अतएव नारदपञ्चरात्र इत्यादिकमपि भवतां पूर्वापरोक्तविस्मृतिकृतम् नारदपञ्चरात्रस्योपरिचरानन्तरमेव नष्टतया तदिदानीं क्व प्राप्तं भवद्भिः? ननु नारदपञ्चरात्रसंहिता ग्रन्थोऽस्मन्निकटे वर्त्तन्ते पूर्वं तु चक्रपाण्यन्तेवासिभिः कैश्चिदिप्रलब्धैरस्माभिस्तथा लिखितमिति चेदस्तु को दोषः? तद्वचनैर्न भवदभिमतसिद्धिः। तत्र "नारायणपरायणाः प्राप्नुवन्ति परं स्थानम्" इत्यारभ्योक्ता शङ्करनिन्दकानां तादृशस्थानानवाप्तिरिष्टैव तथा "अन्धं तमः प्रपद्यन्ते" इत्युक्तनरकावाप्तिरपि तेषामिष्टैव। भगवद्विभूत्यन्तर्गतयत्किञ्चिद्वस्तुनिन्दाया अपि भगवत्प्रसक्तिविरोधित्वमङ्गीकुर्वतामस्माकं ब्रह्मविदग्रेसरशङ्करनिन्दकानां मूढानामिष्टानिष्टफलानवाप्त्यवाप्ती इष्टे इत्यत्र किं वक्तव्यम्? वास्तवार्थप्रतिपादनं

च न निन्दा भवति, ब्रह्मविदागसः मोक्षफलप्रतिबन्धकत्वम्। एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेरिति सूत्रेण व्यासाचार्यैरेव प्रतिपादितम्। तस्मादेकान्तचित्तेनेत्यादिकमपि ब्रह्मविदामोऽजनितपापस्य तत्प्रसादजनकव्यापारमन्तरा निवर्तकं नास्तीति वदतीति तस्य सर्वस्य सङ्गतिः। अतो वास्तविकत्वकथनं श्रुतिस्मृतीतिहासादीनां भवतामेव शोभते इत्यलं पिष्टपेषणेन।

प्रश्न० भेदस्वेच्छास्त्रोक्तदोषभागिनः स्युः।

दुर्ज० इति द्वितीयं वाक्यम्, तत्रोत्तरम्। यदि सोपपत्तिकं शास्त्रैरुक्तस्याभेदस्य विरुद्धं भेदमवदिष्याम तदा दोषभागिनोऽभविष्यामेति प्रत्युत स्वरूपाभेदं वदन्त एव तथा भवेयुरिति।

टी० स्पष्टोऽर्थः।

सज्ज० इति रामानुजीयाः, यत्तु भेदस्वेच्छास्त्रोक्तदोषभागिनः स्युरिति अस्मत्प्रश्नोत्तरेऽङ्कितैर्विशिष्टाभेदस्य शास्त्रसम्मतत्वयौक्तिकत्वाभिप्रायकं स्वरूपाभेदस्य शास्त्रासम्मतत्वायौक्तिकत्वस्वावलम्ब्यानर्थजनकत्वाभिप्रायकं तत्रोत्तरमित्यारभ्य भवेयुरित्यन्तकमुक्तं तदसङ्गतम्। विशिष्टाप्रसिद्ध्या विशिष्टाभेदस्य प्रागेव खण्डितत्वात्। स्वरूपाभेद एव मृत्योः "स मृत्युमाप्नोति य इह नानेव पश्यति" इत्यादिश्रुतिप्रमाणेन सकलवेदान्ततात्पर्यावगमाच्चेत्यलमिति तत्खण्डनमिति।

व्या० यत्तु यत्त्वित्यादिना तत्खण्डनमित्यन्तेन सज्जनशून्ये-